हरिसं॰ सर्ग-२
॥१॥

श्रीसहजानंदायनमोनमः॥ यदाश्रमे नित्यवृन्दावनेल्वचिंसानंदः सवर्णीश्वमसूनुभक्तः॥ कृध्यायमानं तयताद्य
दीयवागंबुधौवाग्जलकेलिरासीत्॥१॥ पूर्वसर्गयथामतिभगवस्ततापमनुवर्ण्येदानीमस्मिन्सर्गेभगवज्ज
न्मप्रस्तावनार्थमुपोद्घातमुपक्रमतेतत्रादौसप्तभिः कुलकेनगोलोकपुरमनुवर्णयसथेसारिभिः अथेति
मंगले मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोन्नथेसमरः कृष्णेतिसदानंदरूपत्वात्स्वाश्रितानांसकलदुःखा
न्युन्मूलयतीतिकृष्णः नराकृतिपरब्रह्मेसथः हर्षेर्वाकृष्णकाद्वर्णेविनापिनक्॥ निर्द्वःखमहानंदवदनंत
अथावदातद्युतिकृष्णवासंगोलोकसंज्ञंपुरमस्तिदिव्यम्॥ स्ववर्त्तुलंभास्वररत्नदुर्गेविराजितंराजपथैरुदा
रैः॥१॥ मुक्तोयाख्यचरणसरोजोऽक्षरधामाधिपोविष्णुरित्यर्थः गोविंदश्चक्रिमुकुंदकृष्णावैकुंठपद्मनाभ
पद्मनाभाहंसभिधाचिंतामणिः विष्णुर्नारायणःकृष्णश्चसमरश्च॥ वससत्रेतिवासोनिवासस्थानं अकर्त्त
रिचकारकेसंज्ञायामितिसधिकरणेघञ्॥ कृष्णस्यवासोयस्मिन्तत्॥ प्रसिद्धप्रवर्णितंचेतद्धि कृष्णतन्मयवेदे स
प्तसंज्ञात्मककांदीपवाक्यदेवमहात्म्येच॥ अवदाताश्रितागौराविश्रुवाद्युतिः शोभायस्यतत् अवदातः
सितेगौरेविशुद्धेप्यमलिंगकः द्युतिः स्त्रीरश्मिशोभायोशितिचमेदिनी दिव्यंवल्गुरुंदरमितिसर्थः दिव्यंवल्गौ ॥१॥

सर्ग-२
दिविभवेः स्मवदितिविश्वः यद्वादिविचिदाकाशोभवमिति अक्षरेपरमेव्योमनयस्मिन् देवाअधिविश्वेनिषेदु
रितिस्ववर्त्तुलमसंतंवर्त्तं भास्वररत्नदुर्गं भासंतेदीप्यंतेहसेवंत्रीलानिभास्वराणिश्चेत्राभास्वपिसकसोचरजिति
दीप्यर्थोद्भासतेः रत्नानिश्चेवरस्तु तथाभूतानियानिरत्नानितत्त्ववितः दुर्गः प्राकारोयस्मिन्तत् प्राकारपार्थिवादेरा
हतिगणत्वाकुत्तरपदलोपः उदारैर्महद्भिः उदारोदातमहतोरितिविश्वः राज्ञांपंथानोराजपथाः कृष्णपुरिस्था
दिनासमासांतोऽप्रत्ययः तैराजपथैराजमार्गेविराजितंविशेषेणशोभितम् उदारमितिपाठेपुरविशेषणं गो
नसार्थदानांचरथैर्विमानैरैविष्णुसद्गुल्मयेरनेकैः॥ विभ्राजमानंलसदंशुमद्भिर्निनादवद्भिर्बरकिंकिणीनाम्॥२
लोकइतिसंज्ञायस्यतत् पुरंनगरंपुरंपुरीतिविश्वः अस्तिवर्त्ततेउपजातिवृत्तमुपादिंदवज्रायदिनौजगौगः उपेंद्र
वज्राजतजास्ततोगौ॥ अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ताः इति अस्याअपिचतुर्दशभेदाः तद्यथा
एकत्रपादेचरणद्वयेवापादत्रयेवामतरस्थितंचेत् तयोरिहाभ्यत्रतदीहनीयाश्चतुर्दशोक्ताउपजातिभेदाः इतिएतासां
नामान्यपिप्राहनेकमेणपिंगलोऽभिदधे यथा कीर्तिः वाणी माला शाला हंसी माया जाया बाला आर्द्रा भद्रा प्रेमा रामा
ऋद्धिः बुद्धिरितिएतद्भेदोऽत्रसाधारणउपजातिभेदः एतासांलक्षणानिग्रंथांतराज्ज्ञातव्यानिविस्तारात्॥१॥ तदि

तिकिंचेतिचार्थः तस्मश्रीहरुधमस्यये पार्षदास्तेषां गेहे विद्रुमानि संति रत्नानि प्रचुराणि येषु तैः आजिह्मसद्रत्नखचि
तैरित्यर्थः तत्प्रकृतवचनइतिप्रचुरार्थे मयट् अनेकैरसंख्यैः लसद्दंष्ट्रभिः लसंतो दीप्यमानाये अंशवो मयूखाः
स्तेविद्यंते एषामितितैः तदस्यास्त्यस्मिन्निति मतुप् यद्यपि नकर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रसायक
इति मत्वर्थीयनिषेधो व्याप्तिस्तथापि तत्कदेशिनैकाधिकरणइतिज्ञापकात् हरुधमसर्पवाल्लक्ष्मीकइति भाष्यका
रप्रयोगाच्चतस्यानिसत्तेन बाधो नास्ति असएव कोकूपीतिचकोरपारणपटुज्योत्स्नातीलोचनैरितिमुरारिः कविः
हंसचिह्नदुकूलवानिति कालिदासश्चैवं प्रयोगो प्रायुंजाताम् ॥ वराः श्रेष्ठाः याः किंकिण्यः क्षुद्रघंटिकास्ता
साम् ॥ किंकिणी क्षुद्रघंटिके समरः ॥ निनादवद्भिः निनादाः नादास्तेविद्यंते एषुतैः ॥ नादे निनाद निनद ध्वनि
ध्वानरवस्वनाः स्वानि र्घोषनिर्ह्रादनाद निस्वान निस्वनाः आरावारावसंरावविरावाइत्यमरः तदस्यास्त्य
स्मिन्निति मतुप् मादुपधायाश्च मतोर्वोयवादिभ्यइति मतुपो मस्यवकारादेशः ॥ विमानैर्देवयानैः ॥ रथैः स्यंद
नैश्च विभ्राजमानं विशेषेण अत्यंतशोभमानं ॥ विमानो व्योमयाने च सार्वभौमगृहेपि चेति ॥ रथः पुमानवयवे स्यं
दनेवेतसेपि चेति च मेदिनी ॥ विपूर्वाद्भ्राजतेः कर्तरि शानच् ॥ अष्टमंडपज्ञादिभेदो बालाद्दृश्य ॥३॥ ॥

श्रीहरिकृष्णायस्वामिनारायणाय नमो नमः ॥ श्रीनीलकंठायहरिकृष्णाय परमात्मने श्रीहरयेनमो नमः ॥३॥

महेतिमहांतोमणयः ग्रामणिश्रेष्ठास्तेषां व्रजा वृंदानि येषु ॥ सप्तमीविशेषणेबहुव्रीहाविति ज्ञापकाद्व्यधिक
रणपदोबहुव्रीहिः व्रजोगोष्ठाध्ववृंदेष्विति विश्वः तेचते दिव्याः अलौकिकारत्नानां स्तंभाः स्थूणाश्च स्तंभः
स्थूणाजडत्वयोरिति विश्वः ॥ तेषामालयः पंक्तयः आलिः पंक्तावितिविश्वः ताभिः नालैस्तैः शोभंते इति तथो
क्तानि नालतैः पवाद्युच् कलधौतानिस्वर्णानि कलधौतंरूप्यहेम्नोरिति विश्वः तेषांजालानि गवाक्षा
येषुतानि पूर्ववद्बहुव्रीहिः तैः जालं गवाक्षइति विश्वः अवितानैरश्रूत्सैः समस्तवस्तुसमृद्धैरित्यर्थः ॥ अपि

महामणीद्रव्रजदिव्यरत्नस्तंभालिशालैः कलधौतजालैः ॥ पंक्तिस्थसौधैरधिशोभमानं पुनर्वितानैरपि चाविता
नैः ॥ ४ ॥ चकिंच ॥ वितानैरुल्लोचैर्युतैर्युक्तैः अस्त्री वितानमुल्लोचो वितानं त्रिषुतुच्छकइत्युभयत्राप्यमरः यद्वावि
तानैर्युतैरप्यवितानैरिति विरोधः अवितानैरश्रूत्सैरिति विरोधः अपिर्विरोधद्योतकः तेन विरोधाभासोलंकारः
विरोधः सोविरोधेपि विरुद्धत्वेन यद्वचइति लक्षणात् पंक्त्याश्रेण्या तिष्ठंतीति पंक्तिस्थानि यानि सौधानि राजसद
नानि श्रेष्ठगृहाणीति यावत् वीथ्यालिरावलिः पंक्तिः श्रेणीति सौधोस्त्री राजसदनमिति चामरः अध्यधिकं यथा न
था शोभमानं अतिशयेन शोभायुक्तमित्यर्थः यद्वा अधिपूर्वाच्छोभतेः कर्तरि शानच मुगागमश्च उपज्ञातिनवमोभेदोऽ

कस्तूरीति कस्तूरीका मृगमदः मृगनाभिर्मृगमदः कस्तूरी चाथ समरः कस्तूरी त्रि ज्ञातस्वार्थे कन् केशरः इति कुस्त्व
कुंकुमं चाह्लीकं मृन्मयकुंकुमं काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतनेद्रमरः केसरो नागकेसरः चांपेयः के
सरो नागकेसरः कांचनाह्वय इत्यमरः एतेषां द्वंद्वः तेऽप्यासयो येषां अगुरुकृष्णागुर्वादीनां तेषां तैर्वा पाटीरं घृष्टं चंदनं
तेन सिक्ता या अंगणानामजिराणां वीथ्यः पंक्तयः पाटीरं घृष्टं चंदनमिति धर्मविजयटीकायां अंगणं चत्वराजिरे
इत्यमरः वीथ्यालिरावलिः पंक्तिरित्यमरः ताभी रम्यम् लाजाभ्रष्टधान्यानि लाजास्यात् भ्रष्टधान्ये इति विश्वः अक्षता

कस्तूरिकाकुंकुमकेसरादिपाटीरसिक्तांगणवीथिरम्यम् ॥ प्रकीर्णलाजाक्षतसत्सुरोहस्रुगंधिमाल्यप्रतिलब्धली
लम् ॥४॥ मार्द्रतंदुलाः अक्षतं नपुंसकयोः पं क्लेसाजेषु न्निषु हिमिति यवेः पिक्व बिठिति मेदिनी लाजः स्यादार्द्रतंदुलेन पुंस
कमुत्रीरेषु क्लिवां पुंभूम्निचाक्षते इति मेदिनी संतोपि प्ररोहः प्ररोहस्त्वं कुरइति वैजयंती यद्वापि अंकुरवाचिन्नं प्ररोहस
मासान्येनाल्पितथाप्यत्रापवांकुरस्तो विवेक्षोग्रही तस्मः फलेप्रभनोगंधो येषां तानि स्फुरगंधवे तिगंधस्येदुत्पूतिस्फु
रभिभ्यइति गंधस्येकारः तथाविधानि यानि माल्यानि नानाविधपुष्पाणि प्रकीर्णैर्विकीर्णैः लाजाक्षतसस्यरोहस्रुगंधि
माल्यैः प्रतिलब्धाधिगता लीला शृंगारभावो येन तत् लीला विद्रुः केलिविलाससरेलशृंगारभावप्रभवक्रियासितिविश्वः

मणीदिति मणीन्द्राः श्रेष्ठमणयस्तेषां संतः शोभनाः कुट्टिमानि बद्धभुवो येषु कुट्टिमो स्त्री निबद्धभूरित्यमरः ते च
ते राजमार्गा घंटापथाश्च तेषु परिव्रजंतं गच्छमाने भूरि प्रचुरं तुरंगनागं हयगजं यस्मिन् तत् द्वंद्वश्च प्राणितूर्यसेनांगा
नामित्येकवद्भावयुक्ततुरंगनागेति द्वंद्वगर्भितबहुव्रीहिः तल्लक्ष्णेन वर्ण्यमानपुरस्थः श्रीवासुदेवो बोध्यः तं द्रष्टुं विलो
कयितुं अनुधावद्भिरनुगच्छद्भिः गोप्यैः गोपीगणैश्च संकुलाभूषवर्त्मा तोरराजमार्गायस्मिन् तत् सापेक्षत्वेऽपि गमकत्वा
त्समासः तृतीयातत्पुरुषाभिधेदोमालादृत्तं ॥५॥ विभासितमिति विलसंतो दीप्यमाना मणीन्द्रामणिश्रेष्ठाश्च अमलरत्न

मणीन्द्रसत्कुट्टिमराजमार्गपरिव्रजद्भूरितुरंगनागम् ॥ गोप्यैश्चतं द्रष्टुमनुव्रजद्भिर्गोपीगणैः संकुलभूपवर्त्म ॥५॥
विभासितं चारुविलाससमंडपैर्विलसन्मणीन्द्रामलरत्नराजिभिः ॥ स्फुरस्प्रभामंडलरत्नवेदिभिर्मनोहरं सन्मणितोरण
प्रभम् ॥६॥ त्नानि चैतैः राजितैः विलासानां मंडपा जनाश्रयाः । अमृधामा दिवन्ताद्यर्थे षष्ठीसमासः मंडपो स्त्री
जनाश्रय इत्यमरः चारवो विलाससमंडपास्तैः विभासितं शोभमानं स्फुरद्दीप्यमानं प्रभामंडलं कांतिमंडलं यासां ता
श्च ता रत्नवेद्यो रत्नरचितपरिष्कृतभूतलानि वेदिः स्यात्परिष्कृतभूमौ नातुमानस्त्रियामंगुलिमुद्रायांस्यात्परिष्कृतभूतले
इति मेदिनी ताभिः मनोहरं चित्ताकर्षकं संतः शोभना ये मणयस्तैर्जाता यस्तद्युक्तानां तोरणानां प्रभा यस्य

हरिसं. स्मिन् तत्र तथोक्तम् मणिः स्त्रीपुंसयो रत्नमजातौ मुक्तादिके ऽपि च कंठदेशो ऽस्त्र नेजायालिंगाग्रे ऽलिंजरे ऽपि सर्ग-१
॥४॥ चेति मेदिनी वंशस्थच्छंदं लक्षणं प्रागुक्तं ॥६॥ विचित्रेति विचित्रवर्णद्रव्यपूरितत्वाद्विचित्रा विचित्रवर्णाः प्रेसं
तः शोभमानाः स्वस्तिका मंगलद्रव्याणि स्वस्तिको मंगलद्रव्ये इति विश्वः तेषु संनिवेशितैः रास्थापितैः यद्वा विचि
त्रेषु छिद्र भूमिचित्रभूम्यादिनेदेन नानाविधेषु सत्सु श्रेष्ठेषु स्वस्तिकेषु गृहभेदेषु संनिवेशितैः यद्वा ॥ विचित्राणि विचि
त्राणि येषु ते च ते सत्स्वस्तिकाः सत्सु चतुष्कास्तेषु संनिवेशितैर्यथास्थानं निहितैः स्वस्तिको मंगलद्रव्ये चतुष्कगृह

विचित्रसत्स्वस्तिकसंनिवेशितैः रत्नदीपावलिभिः सपल्लवैः ॥ मदंबुपूर्णैर्दधिचंदनोक्षितैः स्वर्णकुंभैः स्व
विराजितांतरम् ॥७॥ भेदयोरिति मेदिनी रत्नानां रत्नमणीनां दीपाः प्रदीपकास्तेषामावलयः श्रेणयो ये
पुनैः रत्नं श्रेष्ठे मणावपीति वैजयंती वीथ्यालिरावलिपंक्तिश्रेणि रेखास्तु राजय इत्यमरः सपल्लवैः सकिसलयैः
पल्लवोऽस्त्री किसलयमित्यमरः कोन्यांतरे किसलये प्रोक्तो ऽप्यस्ति पल्लवः किसले चंदले विटपे विस्तरे लक्तरागे शृं
गारपिंगयोरिति संतिनिर्मलानि च तान्यंबूनि जलानि तैः पूर्णाः आपूरितास्तैः दधिगोरसश्च चंदनं संघृष्टप्रसु
वादिगंधद्रव्यं ताभ्यामुक्षिताः सिक्तास्तैः दधिक्लीबे क्षीरजं गोरसस्तत्र इति हेमः स्वर्णकुंभैर्हेमकलशैः स्वत ॥४॥

रं विराजितांतमतिशोभितान्यजिराण्यंगणभूमयश्चत्वराणि यस्मिंस्तत् अंगणं चत्वराजिरे इत्यमरः इत्थंभूतं गोलो
कपुरमस्तीति संबंधः आदिकुलकम् वंशस्थं वृत्तम् ततौ तु वंशस्थमुदीरितं जरौ इति लक्षणात् ॥७॥ अथ प
द्भिरक्षरधाम वर्णयति तदिति द्वाभ्यां स्त्रीपुंसयोः स्थिय्याम् नराः पुरुषाश्च अंगनाः स्त्रियश्च तासां जातं द्वंद्वम् कर्तृ जातं यत्को
घजन्मक्षितिमेदिनी स्वामी क्षराक्षराणामधिपतिः स चासौ नारायणश्चेति नाम आख्यातस्य धृत्नो धारकस्तस्य
आख्याह्वे अभिधानं च नामधेयं च नाम च इत्यमरः हरेः पुरुषोत्तमस्य स्वरूपया करुणया तमाधौ चित्तरोधपूर्वं नि

तदंतरस्थं रूपया समाधौ नरांगनाजातमिदं हि क्षत्रद्राक् ॥ श्रीस्वामिनारायणनामधर्तुर्हरेर्यदस्त्यक्षरधामदिव्यम् ॥
८॥ प्यत्ते ध्याने समाधिश्चित्तनिरोधः इति पातंजलसूत्रम् ॥ समाधिः स्यात्समर्थने चित्तैकाग्र्य नियमयोर्माने ऽस्तने का
र्थ संग्रहे हेमः समाधिर्नियमे ध्याने इति विश्वश्च द्राक् सद्य एव यन्मूर्तौ क्षणात्क्षणाएवेसर्थः द्राक् रूप दिसं ज्ञसाक्षाय
द्राग्द्रक्षु सपदि द्रुतम् इत्यमरः यदक्षरधाम ऐक्षत ताद्राक्षीत् तत् अक्षरधामाक्षरास्त्रं स्थानम् धामदेहे गृहे रश्मौ स्था
ने जन्म प्रभावयोरिति विश्वः तदंतरस्थं तस्य गोलोकस्यांतरे मध्ये तिष्ठतीति तथाभूतम् ॥ अस्ति प्रसिद्धमेतत् द्रुस्रं वेव
र्त्तपुराणस्य श्रीकृष्णजन्मखंडस्कांदविष्णुखंडांतर्गतश्रीवासुदेवमाहात्म्ये वेदव्यासकृतमहाभारतशांतिपर्वो

नर्गतमोक्षधर्मस्थनारायणीयाख्यानेषु छांदोग्योपनिषदि च एतदेवश्रीभागवतेऽव्यक्तम्यक्तं ब्रह्मोक्तं ब्रह्मेतिय 
द्विरुक्तमसादौ अस्मिन् श्लोके उपजातिभेदः कीर्त्याख्यं वृत्तम् तदुक्तम् ॥ यत्रेंद्रवज्राचरणौ पदैकः क्रमेण
यातिप्रथमादिसंख्याम् ॥ उपेंद्रवज्राचरणास्त्रयोऽन्ये तत्तो विभिन्नस्थलगास्तदाख्युः ॥ १॥ उपेंद्रवज्राचरणौ पदेको
यातिक्रमेण प्रथमादिसंख्यां । तदींद्रवज्राचरणास्त्रयोऽन्ये तस्माद्विभिन्नस्थलगा भवेयुः ॥ २॥ तत्रैकपादक्रमम
स्थ्ययेन्ताः क्रमेण तु द्विस्त्रतकृद्विपत्से ॥ अज्ञाथ कीर्तिः कथिता च वाणी ततस्तु वृत्तालेसमभिधा च बालाइति ॥ ८ ॥ स

सहोदितानंतसहस्रसूर्यविधुप्रकाशं सततैकरूपम् ॥ आद्यं जगत्कारणमद्वितीयं यदक्षरं ब्रह्म वदंति वेदाः ॥ ९

हेतिसहैककालमुदितानामुदयं प्राप्तानामनंतसहस्रसूर्यविधवः असंख्याता ये सूर्यविधवः सूर्याचंद्रमसस्तेषां
प्रकाश इव प्रकाशो यस्य तत् सूर्येंद्रोरस्तमयकाले प्रकाशसंकोचजन्यविलापत्वमात्मा कथा हसततेनि सततं नि
संसर्वेषु कालेष्वित्यर्थः एकरूपं अस्तोन्मुखसूर्यचंद्रप्रभावत्परिहृतकांतिरिति भावः ॥ आद्यमादिभवम् दिगा
दिभ्योयदितियस्त्रसयः तथासतिकदाचिद्वसन्निमित्त्यादतआह जगतो विश्वस्य कारणं उत्पत्तिमतो जगतः प्रा
गविद्यमानत्वादाद्यं नतु प्रथमोद्भवेनेत्यर्थः ॥ ननु तर्ह्यनादित्वमाद्यत्वम्पि विरुद्धनिरस्य स्तत्राह ॥ 

अद्वितीयं एतादृशं द्वितीयस्याभावादेकमेवेत्यर्थः द्विशब्दात् द्वेस्तीयइति पूरणार्थे तीयः प्रत्ययः ननु तर्हि कदावि
दपिक्षरणधर्मवत्स्यात्तत्राह अक्षरं क्षरतारहितम् ननु तथाविधमपि संकीर्णं स्यात्तत्राह वेदानिगमाः यद्ब्रह्म व
दंतिसदानंतमुक्तनिवासेऽपि नहदेवतकदापि संकीर्णमित्यर्थः तदुक्तं भागवते दत्तोन्तराधिकैर्यत्र प्रविष्टः पर
माणुवत् ॥ लक्ष्यते नर्गतश्चामेकोटिशोत्यंडराशयः ॥ तदाकृतक्षरं ब्रह्म सर्वकारणकारणं ॥ विष्णोर्धामपरंसा
क्षात्पुरुषस्य महात्मन इति ॥ तथा चोक्तं शतानंदमुनिभिः सुधासिंधावुयो ह्यानप्रकरणे ॥ अस्ति श्रीमतिगोलो

यन्निर्गुणं चामृतधामसंज्ञं ससंपरं ब्रह्मपुराभिधानम् ॥ पूर्णं विविक्तातनुविस्तनंतं यत्सच्चिदानंदसुलक्ष्मयुक्तम् ॥ १०

के सर्वलोकविभूषणे निसाविर्भूतममलं कार्यधामोत्तमोत्तमं ॥ १ ॥ अप्रमेयमनाद्यंतं निर्गुणं निस्समद्वयं ॥ अ
खंडसच्चिदानंदरूपं मायातमः परं ॥ २ ॥ कोटिकोटयर्कचंद्राग्निप्रभाभास्करमुज्ज्वलम् ॥ भक्तैरेकांतिकैरेव प्राप्यक्र
ष्णप्रसादतः ॥ ३ ॥ यदुच्यते ब्रह्मपुरं ब्रह्मचामृतमक्षरं ॥ चिदाकाशं च परमव्योमाख्यं परमं पदमिति ॥ ४ ॥ यद्ब्रह्मत्त
म् ॥ पूर्वोक्तलक्षणं तत्रैव कादशोपजातिभेदः प्रेमाख्यं च ॥ १० ॥ यदिति यत् धाम निर्गुणम् सत्त्वं त्रिष्वपि कालेष्व
विनाशि सम्पूर्णमनाद्यं तं निर्गुणमित्यष्टमस्कंधे भागवते अमृतधामसंज्ञं च अमृताक्षरं हर इति श्रुतेः यत् विवि

काप्युक्तः अतएव नतस्याविनिर्वर्त्तनं यस्य तत् ॥ अनंतंच स सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः यत्परं तमसः परमिति श्रुतेः
यत्ब्रह्मपुरमभिधानं ॥ दिव्ये ब्रह्मपुरे ह्येषः संव्योम्न्यात्मा प्रतिष्ठित इति श्रुतेः । यत्पूर्णं पूर्णमद इति श्रुतेः यत्स
च्चिदानंदाभिधानि स्फुटं तच्छोभनानि यानि लक्ष्माणि चिह्नानि तैर्युक्तम् । एतच्च परिशिष्टप्रमाणजालं तु श्रीगोपालानंद
स्वामिचरणैः कृते वेदस्तुतिसारादिभाष्ये सविस्तरमवगंतव्यम् इति वेदा वदंतीति पूर्वेणान्वयः युग्मम् । द्वाभ्यां युग्म
मिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् कालापकं चतुर्भिः स्यात्कुलकं स्यात्ततः परमिति लक्षणात् । इंद्रवज्रावृत्तम् ।
परं यदग्राह्यमितः पवित्रं कृतांतमायाभयहीनमस्ति ॥ अहस्कराद्यैरविभासनीयं गत्वात्र नो यैन निवर्त्तनेयत् । १२
स्यादिंद्रवज्रा यदि तौ जगौ ग इति लक्षणात् ॥ १० ॥ परमिति यदग्राह्यमितः येभ्यस्तत्त्वेभ्यः रसनादिगुणपृथिव्यप्तेजोवा
य्वाकाशाहंमहत्सु प्रकृतिभ्योः आवरणेभ्यः पंचभ्यास्तत्सिद्धिनित्यसिद्धमस्मर्थः । परं भिन्नं सदा पवित्रं पतितत्रताकारि
त्वतः पवित्रं वा कृतांतान्मायायाश्च यद्भयं तेन हीनं कालमायाभयरहितमित्यर्थः । यदस्ति यत् अहस्करः सूर्यस्तदा
द्यायेषां तेषां चंद्राग्न्यादीनां तैरविभासनीयं न प्रकाश्यं । न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽ
यमग्निस्तमेव भांतमनुभाति सर्वमिति श्रुतेः यद्धामं गत्वा प्राप्य असौ जनः लोकः न निवर्त्तते पुनः संसारं न प्रा ॥ ६ ॥

प्नोतीत्यर्थः ॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम इति भगवदुक्तेः ॥ उपजातिभेदो बालाख्यं वृत्तम् लक्षणं तदुक्तं
प्राक् ॥ ११ ॥ सन्मंदिरैरिति विचित्रो वर्णः शुक्लादिर्येषां तैः । वर्णो द्विजादौ शुक्लादौ इति विश्वः दिव्याः विचित्रवर्णा
नानाविधा मणीन्द्रा यासु ताः दिव्यविचित्रवर्णनानामणीन्द्राः अमला निर्मला निर्मलास्ताः अमलरत्नाः तथाभूताः
शालाः आगारैकदेशा येषु तैः शालागृहैकदेशे तरुस्कंधशाखयोः आगारैकदेशयोरिति विश्वः ज्वलितैः दीप्तैः अनेकैर्बहुभिः
सन्मंदिरैः संति चलानि मंदिराणि आगाराणि चलैस्तथोक्तैः । सन्महत्सरमोत्कृष्टसाधुप्रमानेरिति तत्सुरूपः मंदिरं न
सन्मंदिरैर्दिव्यविचित्रवर्णनानामणीन्द्रामलरत्नशालैः ॥ विद्योतमानं ज्वलितैरनेकैर्मुक्ताधिवासं प्रथितानुभाव
म् ॥ १२ ॥ गरेऽगारे इति विश्वः यद्धाम दिव्यैर्विचित्रवर्णैर्नानामणीन्द्रैरमलैः रत्नैः शालं तेषां शोभं तेनाभितथोक्ता
नितैः शालस्तेपचादि सन्मंदिरैः । विद्योतमानं विशेषेण प्रकाशमानम् । विपूर्वाद्द्योततेः कर्त्तरि शानच मुगागम
श्च प्रथितोऽनुभावो विख्यातो महिमा यस्य तत् । यद्धाम प्रथितेषु सत्सु गुणविख्यातेषु मुक्तेषु अनुभावो महिमा यस्ये
ति । यद्धाम प्रथितैरनुभाव्यते अनुभवगोचरः क्रियते इति । मुक्ताः अधिवसंसत्र इति ॥ अकर्त्तरि च कारके संज्ञा
यामित्यधिकरणार्थे घञ् । यद्धाम मुक्तानामधिको वासो यत्र इत एकादशश्लोकानामिंद्रवज्रावृत्तम् ॥ १३ ॥

हरि.स. ॥१॥ समुल्लसितेति। समुल्लसिता समुत्कटा अमेयानंतदिनरत्नभोगादीनां प्रतिमा उपमा येषां तैस्तथोक्तैः सर्वोत्तरश्रीमन्निश्शिखरर्थैः सर्ग-३
नीरजविष्टरः कमलासनो ब्रह्मा आद्यो मुख्यो येषां तैस्तथोक्तैर्देवैः। अलब्धैः कदाचिदप्यप्राप्तैः तुरंगराजोनाग
गाधीशाः शेषस्तेनापि अनधिलब्धोऽप्राप्तः पारोवसानं येषां तैस्तथोक्तैः दिव्यैरप्राकृतैः भोगैः त
थाभूतैः पदैर्निवासस्थानैः तथाभूतैः करैवैश्च तथाभूतैर्भोक्तृभिर्भोगं भुंजानैर्भक्तगणैः युतं सहितमेव तदस्तीति
शेषः ॥१३॥ अथाक्षरधाम्नि भगवंतमनुवर्णयति तस्मिन्निति मायापरं तमः शब्दवाच्यप्रकृतिपरे तमसः परस्ता

समुल्लसितामप्रतिमैरलब्धैर्भोगैः पदैर्नीरजविष्टराद्यैः॥ करैर्युतं भोक्तृभिरेव दिव्यैरुरंगराजानधिलब्धपारैः॥१३॥
तस्मिन्सदास्ते पुरुषोत्तमोऽसौ मायापरे श्रीहरिकृष्णसंज्ञः॥ मुक्तैरसंख्यैः परिसेव्यमानो राजाधिराजो रमणीयरूपः॥
१४॥ दिति स्मृतेः पूर्वादिभ्यो नवभ्यो वेति पाक्षिकः स्मिन्भावः तस्मिन्नक्षरधाम्नि असंख्यैरगण्यैः मुक्तैः परिसे
व्यमानः परि पूर्वात्सेवतेः कर्मणि शानच् मुमागमश्च परिनिविभ्यः सेवसितेत्यादिना परिसाद्यासस्य सेवतेः सस्य
षत्वं राजसु राजते शाट् वा स्वेषु अधिकं राजते शोभते इति तथोक्तः। अधिपूर्वाद्राजतेः पचाद्यच्। यद्वा राजा चेन्द्रः अधि
राजोऽधिकशोभाविशिष्टो येन राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोरिति विश्वः रमणीयं रूपं यस्य सः पुरुषेषु ॥१॥

त्तम इति सप्तमी समासः न निर्धारणे इति षष्ठी समासनिषेधात् कर्मधारये तु सन्महत्परमोत्तमोत्कृष्टाः पूज्यमा
नैरिति पुरुषोत्तम इति स्यात् असौ हरिः पमानः श्रिया युक्तो हरिकृष्णः श्रीहरिकृष्णः इति संज्ञा नाम यस्य सः सदा
निरंतरम् आस्ते वर्त्तते तिष्ठति वा ॥१४॥ एकांतिकेभ्य इति यत्रैस धाम्नः कार्येयत्राक्षरधाम्नि वृंदावनेंदुः वृंदावनचंद्रः
अनेन पदेन तत्र वृंदावनमप्युक्तं वनं वृंदावनं यत्रेत्युक्तेः महांश्चासौ पयोधिश्च महापयोधिरानंदस्य महाप
योधिरानंदमहासमुद्रः महत्त्वेनानंदनिःसीमता द्योतिता यः श्रीहरिकृष्णः अखिलानां समग्राणामेकांता

एकांतिकेभ्योऽखिलतापहारिस्वदर्शनस्पर्शवचोमृतैर्यः॥ वृंदावनेंदुर्वितरत्यनंतमानंदमानंदमहापयोधिः॥१५
पहारिभिः स्वदर्शनस्पर्शवचोमृतैः स्वस्य दर्शनं मूर्तिदर्शनं दानं च स्पर्शः स्वसंमेलनजसंस्पर्शश्च वचोमृतानि स्वा
गतप्रश्नवाक्यामृतानि च तैः एकांतिकेभ्यः एकादन्यत्स्वं धीर्येषांते एकांतिका नामभ्यः आनंदमप्राकृतनिरतिशयान भक्तिम:
नंद वितरति ददाति विपूर्वस्य तरतेर्दानार्थत्वं विश्राणनं वितरणमित्यमरोक्तेः अत्रानंदपदस्यावृत्त्या यमकाल
कारः तदुक्तं सस्वरव्यंजनावृत्तिसाम्ये वर्णकं यमकं भवेदिति तल्लक्षणात् वृत्तरत्नाकरस्य सेतुटीकायां तु अर्थे सत्यर्थ
भिन्नानां वर्णानां सा पुनः श्रुतिः यमकमिति तल्लक्षणमुक्तम् अत्र वर्णस्तबकस्तबकमिति महिम्नात्राक्षरध

भृतिषुतादृगावृत्तिस्त्वेयमकालंकारः ऽक्षराणामावृत्तिस्त्वेवलाटानुप्रासइतियमकानुप्रासयोर्भेदइतिलक्षण
श्लोकटीका ॥१५॥ तेभ्यइति सर्वज्ञः नित्यापरोक्षानपेक्षितसाधननिरवद्यज्ञानगोचरसर्ववस्तुस्वरूपः यः सर्व
ज्ञः सर्वविद्यस्यज्ञानमयंतपइति श्रुतेः अक्षरात्माअक्षरात्माचाक्षरात्माचेतिस्कांदोक्तेः सतांभक्तानांवशंगाव
शंगतः वशंगतइतियुक्तस्य यः अहंभक्तपराधीनइतिभागवतोक्तेः उदारोदातामहांश्च उदारोदातृमहतोरि
ति विश्वः आप्तानांवेदानांकर्त्तासाधकः आप्तवागनुमानाभ्यांइत्यादावाप्तसशब्दोवेदवचनः तथाचस्मृतिः वेदा

तेभ्यः सदैवाखिललोकधर्त्ता दर्शनस्वमूर्त्तीक्षणमाप्तकर्त्ता ॥ सर्वज्ञ एषः प्रभुरक्षरात्मा भक्तवशो भगवानुदारः ॥१६

तद्धेदविदेवचाहमितिभगवान् ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसः श्रियः ज्ञानवैराग्ययोश्चापि षण्णांभगइतीग
नेतिस्मृत्युक्तो भगोऽस्यास्तीति तथोक्तः भगंश्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु माहात्म्यैश्वर्ययत्नेषु धर्मेम
क्षेचनारवानितिमेदिन्युक्तेः भगंधर्मोऽस्यास्तीतिवा यद्वा ॥ उत्पत्तिंचविनाशंचभूतानामगतिंगतिं ॥ वेत्तिविद्याम
विद्यांचसवाच्योभगवानितिउक्तलक्षणः अखिलानांलोकानांभुवनानांधर्त्ताधारकः भुवनानिदधेइतिश्रुतेः लो
कोजनेऽपिभुवनेइतिमेदिनी यद्वा अखिलानांलोकानांजनानांधर्त्तापोषकः डुभृञ्धारणपोषणयोरस्मात्तृ

च् तद्योगेषष्ठीसमासः एषः प्रभुर्वासुदेवः तेभ्यएकांतिकभक्तेभ्यः सदानिरंतरं स्वमूर्त्तिः स्वतनुस्तस्या ईक्षणं
दर्शनंआदनेऽआसमंततोवितरतिनकदापिदूरेतेभ्यस्तिष्ठतीत्यर्थः अकर्तृगामिफलत्वेपिआङोदोऽनास्य
विहरणइत्यात्मनेपदम् पूर्वंसाधारणंदर्शनदानमुक्तं अत्रतुविशेषतइतिनपुनरुक्तिः ॥१६॥ तस्मिन्नन्यधी
तिमत्कृतस्यश्रीमातिशायतांद्योतयन्नाहनेतियः श्रीहरिरूपः तेषामेकांतिकभक्तानाम् नैघ्र्यमायन्नन्त्यम् उ
पेत्यसंप्राप्य अतिसक्तिमतिप्रीतिंभजंतिकुर्वंतीतितांस्तथोक्तान् स्वानेकांतिकभक्तान् कर्हिचित्कदाचिदपि न

नकर्हिचित्स्वानतिसक्तिभाजोजहातिनैघ्र्यंयनुपेत्यतेषाम् ॥ छायायथैवानुचरस्तजस्त्रंरज्ज्वेवबद्धस्तदनन्यरसा
१७॥ जहातिनसृजति तेषामेकांतिकभक्तानांयाऽनन्यरतिर्वक्रूपीति स्तयारज्ज्वारज्जानयेवबद्धः सितः सन् छाया
यायथातथैवेतिशेषः अजस्रंसततम् अनुचरस्त्वनुगच्छत्येव तथाचोक्तंहरिवाक्यसुधासिंधौ यदानिर्वासनोभ
क्तः सिद्धीरपिनवीक्षते ॥ तदातस्यवशोऽहंस्याम् स्वयमेवभवस्थलम् ॥ तस्याधीनोभवस्येवप्रीतोभक्तप्रियोहरिः
यथापुरादेसपतेर्बलेरात्मनिवेदिनः ॥ एवंस्वस्मिन्नतिप्रेमणोभक्तस्यहृदयाद्धरिः ॥ प्रेमरज्ज्वावद्धपादोगंतुंत्रा
क्नोतिनक्कचिदिति ॥ श्रीमद्भागवतेच ॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ॥ प्रण

हरिसं॰ यरसनया धृतोऽङ्घ्रिपद्मः सभवति भागवतप्रधानउक्त इति॥ भगवान् भक्त भक्तिमानिति श्रीशुकोक्तिरपीममेवा सर्ग॰ २
॥९॥ र्थं दर्शयति॥ नत्वा कुर्वंति येस्यातुं दूरेक्षणमपीहते॥ वीक्षंते दृष्टोलग्नंछायासहचरं हरिमिति गंगाधरभट्टो
क्तिश्च। एवंभूतत्वं भगवतस्तु भक्तस्यात्मनि भक्तिरसातिशयदर्शनेन सप्रपंचभक्तिरससमर्थनं तत्रांऽशिस्तत्र भा
ष्यादावस्ति रतिर्देवादिविषया भाव इति मम्मटः एवमेव भरतस्तत्रैलोद्भटादयश्चापि। रसविलासे भूदेव शुक्लश्चा
पि एवं तत्क्षिप्रति पन्नो सम्मोदिङ्मात्रं तत्त्ववस्थालिरमते अत्र भगवत्प्रोक्ता अव्यभिचारिणी भक्तिः स्थायिभावः

निसंकित्रोरः करुणा विहारी रम्यः क्रिवा कूजनर्मकारी॥ श्रीमल्लवीनांबुदकंदराग ऽपीतांबरोवेणुधरः शुभांगः
१८॥ पूर्णानंदप्रदो हरिरत्रालंबनविभावः यतः भक्त भक्तिमानु यथोद्भवः प्रियतमो भवान्। प्रियो हि ज्ञानिनोऽत्यर्थ
मिमादौ भक्तभगवतोरालंबनविभावत्वं प्रसिद्धमेव निर्णीतम् तद्गुणश्रवणादयोत्रोद्दीपनविभावाः रोमांचादयो
भगवत्तोदिताऽनुभावाः सात्त्विकाश्च औत्सुक्य निर्वेदधृतिमस्मादयोऽत्र संचारिणोभावाः प्रह्लादार्षभभरताद
योभक्तिरसवंतो भागवतादौ प्रसिद्धाः एतत्समर्थतमात्राधरभट्टैरसिकानंदाख्यग्रंथेऽपिकृतमस्मतो लंप्रपं
चपद्धवितेन॥ १७॥ निसमिति यत्सधाहार्ये निसंसदाकित्रोरस्तरुणावस्थः किशोरस्तरुणावस्थे इति विश्वः ॥९॥

विहरतीत्येवंशीलो विहारी ताच्छील्ये णिनिः करुणया दयया विहारी विहरणशीलः सर्वथा पूर्णत्वात्स्वतत्त्व स
त्वात्स्वात्मनैरपेक्ष्यत्वेऽपि दयापरतंत्रः सन् भक्तजनैः क्रीडाकर्तेत्यर्थः रम्यो रमणीयो क्रिवाकूजनस्य सः जनानां स्वीय
भक्तानां नर्मकरत्वं करोतीत्येवंशीलः ताच्छील्ये णिनिः श्रीमान्लवीनायोंबुदो मेघस्तद्वत्कंदरमंगं गात्रं यस्य सः
पीतं पीतवर्णमंबरं वासो यस्य अंबरं वास सित्योम्नीति विश्वः धरतीति धरः पचाद्यच् वेणोर्वंशस्य धरो धारकः न
नु कर्मण्युपपदे कर्मण्यणि सेण प्रसपे वेणुधार इसेव स्यादिति चेन्न गंगाधरभूधरादिवत्कर्मणः शेषत्वविवक्षा

अंभोजवज्रध्वजचापमुख्यैर्लसद्भिः षोडशाभिः शुभांकैः॥ रत्नोल्लसन्नूपुरसिंजिताङ्घ्रिर्गभीरनाभिः कृशतुंदशाली
१९॥ यांपचाद्यज्विधानात् शुभानि सामुद्रिकोक्तानि शोभनानि अंगानि यस्य सः शुभानि क्षेमाणि दिशत्वादनुपद्रुवा
णीनि यावत् अंगानि प्रतीकायस्य सः शुभो योगे शुभं क्षेमे वाच्यवत्क्षेमशालिनीति मेदिनी। अंगं गात्रांतिकोपा
यप्रतीकेष्वप्रधानके इति विश्वः॥ १८॥ अंभोजेति अंभोजं कमलं च वज्रं पविश्च ध्वजः केतुश्च चापं धनुश्चैतानि मु
ख्यानि येषु तैः ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविरित्यमरः ध्वजः स्याच्चिह्ने केतौ पुमान् न स्त्रियां तु पताका
यामिति मेदिनी अस्त्रं धनुर्धिष्वासकोदंडधन्वकार्मुकं चापमिति हलायुधः षोडशाभिः षोडशसंख्याकैः शुभांकैः

धर्मायव्रजनक्षेमकरचिह्नैः अंकोरूपकभेदांगचिह्नरेखातिभूषणादिनिमेदिनी लसतीत्यर्थः मानेपदेचरणेयस्य सतथोक्तः सापेक्षत्वेऽपिगमकत्वात्समासः पदंमवमितत्राणस्थानलक्षणांघ्रिवस्तूष्वितिस्मरः रत्नैर्मौलिभि रुल्लसंतौयौनूपुरौमंजीरौताभ्यांसिंजंतौकलनादेनोच्चारणयुक्तावंघ्रीपादौयस्यसतथोक्तः आधाराधेयभा वान्नूपुरयोः शोभायमानत्वंचरणयोरुपचर्यते नूपुरोमंजिरोऽस्त्रियामितिस्मरः गंभीरोनिम्नांतरुन्नतोनाभीह्र दःप्रतापिकाकूपोयस्मिंस्तथाभूतंयन्तुंदमुदरंतेनवृत्तलतेदृनितथाभूतः भगवत्प्रसादस्थितानियानिचिह्नानिसु दितानिपाद्मे ॥ योऽस्त्रैवतुचिह्नानिमयादृष्टानितत्पदे ॥ दक्षिणेचाष्टचिह्नानिइतरेसप्तएवहि ॥ ध्वजःपद्मंतथा वज्रमंकुशोयवएवच ॥ स्वस्तिकंचोर्ध्वरेखाचाप्यष्टकोणंतथाष्टमम् ॥ इंद्रचापंत्रिकोणंचकलशंचार्धचंद्रक अंबरमत्स्यचिह्नंचगोष्पदंसप्तमंस्मृतम् ॥ षोडशांकंतथाचिह्नंशृणुदेवर्षिसत्तम ॥ जंबूफलसमाकारंदृश्य तेयत्रकुत्रचित् ॥ शंखध्वजातपत्रैश्चविह्नितंचरणद्वयमिति ॥ गोपालतापन्यांतुशंखादिचिह्नैर्योप्युक्तः च क्रांकितपदातेनेतिवाराहेचक्रमप्युक्तमेवंचचक्रशंखातपत्रेरूनंचिन्हानितिचिह्नान्यपिभवंति ॥ एतानिसर्वचि ह्नानिधृतरूपमवतारश्रीहरिरूपपादएवअंकान्येतानिभोविद्वन्दृश्यंतेतुपदातदा ॥ श्रीरूपमात्र्यंपरंब्रह्म तत्क्षिप्तेयंनसंशयः ॥ द्वयंवाथत्रयंवापिचत्वारिपंचचैवहि ॥ दृश्यंतेवैरूपमवश्रेष्ठअवतारेकथंचनेनितोष

रणीसारेपाद्मे ॥ एतेषांसन्निवेशप्रकारस्तुध्यानात्स्वभास्करादेश्चिदेषयतोऽवगंतव्यः पाद्मेऽपिसन्निवेशप्रकारेवि शेषतोऽस्तिसचापिग्रंथगौरवभयाद्विशेषतोनप्रपंचितः एतानिसर्वाणिरेखाकारेणज्ञेयानि ॥१९॥ पदइति यः श्रीहरिः कामिसत्यायंकुब्जायाम् कुत्सितोदर्पोऽस्यकंदर्पः यद्वा कंसुखंतत्रतेनवादृप्यतिदर्पयतिवाकंदर्पः द र्पहर्षमोहनयोः पचाद्यच् ॥ कोटयः कोटिसंख्याकाः कंदर्पाअनंगाः कोटिः स्त्र्यधिनुष्याऽग्रेऽश्रोसंख्याभेदप्रक र्षयोराशितिमेदिनी ॥ कंदर्पोदर्पकोऽनंगइतिस्मरः ॥ तेषांकदर्पाः सर्वविजेतृत्वरूपाः कृतरांगगर्वास्तेषां हन्ता आसाम् यःकोटिकंदर्पस्कदर्पहन्ता विचित्रदिव्योपलप्रभालिमौलिः ॥ हेमांगदाभः करकंकणश्रीः कर्णोल्लसत्कुंडलस त्कलापः ॥२०॥ लसदुल्लसन्धाता ॥ हस्तकंदर्पदर्पहेतिश्रीधरस्वामिनः कामंदहंतिकृतिनोननुरोषदृष्ट्याऽऽग्धंदहं तमुतेनदहंत्यसत्यम् ॥ सोयंपदंतरमलंनिविशन्त्विभेतिकामः कथंनुपुनरस्यमनःश्रयेतेतिभागवतेचो क्तेः ॥ कर्णयोरुल्लसतीयेकुंडलेकर्णवेष्टनेतयोस्तएवचासत्कलापः सद्भूषणंयस्यसः ॥ कलापोभूषणेब र्हेतूणीरेसंहतेऽपिचेस्मरः हेम्नः स्वर्णस्यअंगदेकेयूरेताभ्यामाभातीतितथोक्तः केयूरमंगदंतुल्येइस मरः विचित्रानानावर्णादिव्याअप्राकृताप्रउपलारत्नानितैः शालतेशोभतेतथाभूतोमौलिर्मुकुटंयस्यत

हरिसं. योक्तः उपलः प्रस्तरे रत्ने इति विश्वः करयोर्हस्तानूर्ध्वयोः कंकणैः करभूषणैः श्रीः शोभा यस्य सः ॥ २८ ॥ आमुक्ते सर्ग.२
॥११॥ ति मुक्ताफलानि मौक्तिकानि तेषु सारः श्रेष्ठमुक्ताफलानि तेषां हारः स्रक् आमुक्ता प्रतिमुक्ता मुक्ताफ
लसारहारा येन सः सारो मज्जा स्थिरांशयोः बले श्रेष्ठे चेत्यनेकार्थसंग्रहे हेमः आमुक्तः प्रतिमुक्तश्चापिनद्ध
श्चापिनद्धवदित्यमरः श्रियाः स्वात्मसौतिरूपया युक्तः श्रीयुक्तः सचासौ कौस्तुभश्च श्रीकौस्तुभः शाकपा
र्थिवादित्वादुत्तरपदलोपिसमासः तेन उद्भासित उत्कृष्टशोभायुक्तः कंबुवत्त्रिरेखायुक्तः कंठो यस्य सः कौस्तु

आमुक्तमुक्ताफलसारहारः श्रीकौस्तुभोद्भासितकंबुकंठः ॥ विशुद्धमण्युज्ज्वलरत्नरोचिः कांचीकलापः परि
पूर्णकामः ॥ २९ ॥ भस्य स्वात्मसौतिविष्णुमुक्तं श्रीमद्भागवते द्वादशे ॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बि
भर्त्यजः इति ॥ विशुद्धमणीनां निर्मलानां रत्नाकरोपलानामुज्ज्वलरत्नानां श्रेष्ठानां प्रवालादीनां च हारग
तानां रोचिः ॥ कांतिर्यस्य सः मणिर्द्वयोरश्मजातौ रत्ने मेदाग्रे लिंगेरत्ने इत्यभिधानचिंतामणिः रत्नं श्रेष्ठे मणा
वपीति वैजयंती ॥ यद्वा ॥ विशुद्धमणीनां स्फटिकादिनिर्मलोपलानामुज्ज्वलरत्नानामिंद्रनीलादिकांति
मद्रत्नानां रोचिः कांतिर्यस्यां तथाभूता कांची मेखला तस्याः कलापो भूषणं यस्य सः परिपूर्णः कामो यस्य सः ॥ २९ ॥ ॥११॥

यद्वा इति यो भगवान् श्रीहरिः सर्वभर्त्ता सकलविश्वपोषकः अखिलस्य समग्रस्य विश्वस्य जगतो यंता नियामकः
जगतां विश्वेषां भुवनसन्निवेशस्य स्थेमस्थितिर्निश्चलयोनाशस्त्रे आदयो यस्य निग्रहानुग्रहकर्माणस्ता एव लीलाय
स्य सः तथोक्तः शेषः संकर्षण आदिर्मुख्यो येषां सनकादीनां तैर्गीतः प्रथितो ऽनपावृतः प्रतापः यथाकर्मय
थासमयं सर्वजनशुभाशुभकर्मफलप्रदानलक्षणः प्रभावो यस्य सः तथोक्तः लावण्यं च सौंदर्यं च गुणास्ते
षामंबुराशिः समुद्रः लावण्यलक्षणं तु मुक्ताफलेषु छायायास्तरलत्वमिवांतरा प्रतिभाति यदंगेषु तल्लाव

यः सर्वभर्त्ताऽखिलविश्वयंता जगज्जनस्थेमलयादिलीलः ॥ शेषादिगीतप्रथितप्रतापो लावण्यसौंदर्यगुणांबु
राशिः ॥ ३० ॥ एतदिह प्रोच्यत इति यद्वा लावण्यशब्दो विनयादिगुणवाचकस्तद्वत्वं लावण्यं बोध्यम् सौंदर्यं तु सु
अतीव जनचित्तमाक्षिप्य मिथिचित्तं द्रवीकरोतीति सुंदरः उन्दी क्लेदने स्फपूर्वो दमाङ्कुरकादरः शकंध्वादिः न
स्य भावः सौंदर्यम् गुणवचनब्राह्मणादिभ्य इति भावे ष्यञ् प्रत्ययः सौंदर्यं सुंदरांगदर्शकजनानंददायकत्वं वा
गुणास्तु भागवते प्रथमस्कंधे पृथ्वीधर्मसंवादे एकोनचत्वारिंशदुक्ताः ॥ सत्यं शौचं दयाक्षांतिस्त्यागः संतो
ष आर्जवम् ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ १ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ॥

स्थानं त्र्यंकोऽत्र्यलंकांतिर्धैर्यं मार्दवमेव च ॥ २ ॥ प्रागल्भं प्रश्रयः शीलं सहओजो बलं भगः ॥ गांभीर्यं स्थैर्यमास्ति
क्यं कीर्तिर्मानोऽनहंकृतिः ॥ ३ ॥ एते चान्ये च भगवन्नित्या इत्यादिना ॥ ३३ ॥ यमिति यं श्रीहरिम् केचिद्धिरण्यगर्भाः पर
मात्मेति मंत्रज्ञा यस्तम् आहुः अन्ये इतिहासज्ञाः यम् नारायणम् आहुः औपनिषदाः यम् परम् ब्रह्म आहुः
वेदाः यम् पुराणमनादिम् आहुः अन्ये सांख्याः यम् क्षेत्रज्ञसंज्ञं पुरुषम् आहुः पुराणज्ञाः यम् पुरुषोत्तमम्
साख्यायस्तम् आहुः एके पांचरात्राः यम् वासुदेवम् भगवंतं च आहुः ॥ ३३ ॥ पूर्वमिति पूर्वोक्तानां यच्छब्द

येके चिदाहुः परमात्मसंज्ञं नारायणं ब्रह्म परं पुराणम् ॥ क्षेत्रज्ञसंज्ञं पुरुषोत्तमाख्यं यं वासुदेवं भगवंतमेके
३३ ॥ पूर्वं सहस्रशोऽत्र जनताहिताय श्रीधर्मदेवादजनिष्ट मूर्त्तौ ॥ तदा तदीयं नरनारायणपूर्वं बभूव नारायणनामधेयम्
३४ ॥ नाम सहस्रमहसनेनान्वयः पूर्वं प्रथममतः सोऽक्षरधामनिवासी कृष्णो वासुदेवः जनतानां भारतवर्षीयजन
समूहानाम् हिताय हितं कर्तुं क्रियार्थोपपदस्येत्यादिना कर्मणि चतुर्थी क्रियायुक्तो यो धर्मदेवस्तस्मात् ॥ मूर्त्तौ
मूर्त्त्याख्यधर्मपत्न्यां अजनिष्ट जज्ञे तदा तस्मिन्काले तस्य कृष्णस्येदं तदीयं नरनारायणः पूर्वो यस्मिन् तत्तथाभूतं
नाम एव नामधेयम् भागरूपनामभ्यो धेय इति स्वार्थे धेयः प्रत्ययः नरनारायण इति नाम बभूवाभूत् अत्र नर ॥१३॥

नारायणपूर्वकत्वेन नारायणनाम्नस्येवन तु संज्ञिनस्तदर्थस्येति नाम्नः परस्य नारायणनाम्नः स्वार्थगतत्वेनाप्रयोगस्य प्रयो
गात् अवाच्यवचनार्थाख्यं दोषमाहुः यद्वाच्यस्य वचनमवाच्यवचनं हि तदिति समाधानमेवं विधविषयेऽत्र शब्द
परेणार्थलक्षणेति कथंचिन्नं ख्याद्यम् एवमेवोक्तं महिनाथ्यक विशिर्हिरण्यपूर्वं कशिपुं प्रचक्षते इत्यस्य व्या
ख्याने देवपूर्वं गिरिं तदिति धनुरुपपदमस्यैवेदमभ्यादिश्यते सेत्यस्थाने संज्ञा विमोघं टापथे च विज्ञेषश्चा
त्रायम् भगवन्तमुद्दिश्य नरनारायणपूर्वं नारायणनामधेयं बभूवेति संज्ञात्वेन प्रयुक्तम् उपपत्तेरादर्शाभेदेनाम

आर्षीं प्रजानामिह भारतीनां शुभाकृतिर्यः परमोरुधामा ॥ नित्यं तपः शर्मकरो विधत्ते कारुण्यसिंधुर्बदरीवन
स्थः ॥ ३५ ॥ वृत्तं ॥ ३४ ॥ तमेव विशिनष्टि द्वाभ्याम् आर्षीमिति इहास्मिन्लोके ऋषेरियं आर्षी तस्येदमित्यण् टि
डाणिञित्यादिना ङीप् तां शुभां मंगलाया आकृतिः आकारः आकारो देह आकृतिरिति वैजयंती ॥ तां दधानो
बिभ्राणः भरतखंडे भा वा भारस्तस्यासौ तत्र भव इत्यण् प्रत्ययः टिड्ढाणञित्यादिना ङीप् प्रजानां जनानां प्र
जास्याकंतनौ जन इत्यमरः शर्मणः सुखस्य करः विधायकः शर्मशातसुखानि चेत्यमरः परमः सर्वोत्कृष्टः
यद्वा परा प्रकृष्टा मा लक्ष्मीः कांतिर्वा यस्य सः यद्वा परैर्योगिभिर्मीयते ज्ञायते इति परमः यद्वा परान् ॥ शत्रून्

रागद्वेषादीन् मिनातिहिनस्तीतिपरमः मीञ्हिंसायांतस्माद्दोणादिकोडः प्रत्ययः यद्वा मननंमामनुज्ञानेऽवबोधनंवेतिधातोरौणादिकोडःप्रत्ययः अज्ञादेराकृतिगणत्वाट्टाप्प्रत्ययः पराप्रकृष्टामाज्ञानंयस्यसः यद्वामनुनेज्ञानातिसर्वमितिमः परश्चासौमश्चेति यद्वायद्वामनुतेइतिमंमनः परंप्रकृष्टंमंहृदंवातद्यस्मात् हृदानात्मोऽन्यमाः पराद्समरः मनोऽगोचरइत्यर्थः कारुण्यं करुणाभावस्तस्यसिंधुः समद्रः सिंधुः समुद्रेनद्यांचेतिविश्वः बदरीणांकर्कंधूवृक्षाणांवनंतत्रतिष्ठतीतितथोक्तः निनीदुनिष्कंटकनिविडच्छायमधुरफलातिविस्तृत



मुनिस्वरूपोऽनुपमस्तपोनिधिर्विधायदिव्यपुरुतस्कवंतपः॥ परंप्रवृत्ताभ्यः प्रतिघस्रमीश्वरोददात्युदारःपरमोरुविक्रमः॥२४॥ कर्कंधूवनोपलक्षिताश्रमसन्निविष्टइत्यर्थः योनरनारायणः निसंज्ञाकल्पंतपःनैष्ठिकब्रह्मचर्यपालनपूर्वकंतदाश्रमोचितेंद्रियनियमनादिलक्षणंविधत्तेकरोतिआकल्पादास्थितस्तपइतिभागवतोक्तेः इंद्रवज्रावृत्तम् लक्षणंतूक्तप्राक्॥२५॥ मुनीतिमुनिस्वरूपः मुनीनांसनकादीनांमिवधनंरूपमाकारोयस्यसः रूपंस्वभावेसौंदर्येनाणकेपशुशब्दयोः ग्रंथावृत्तौनाटकादावाकारश्लोकयोरपीतिविश्वः यद्वामुनयोऽगस्त्यादयः स्वरूपंविभूतिर्यस्यसः मुनिर्यतौगुदीवुद्धप्रियालागस्तिकिंशुकेइतिविश्वः नास्युपमायस्य ॥१२॥

सःतपसांनिधिः यद्वातपांसिवहुविधास्तपःप्रकारास्तानिनिधीयंतेऽस्मिन्निति सर्वतपः साधकइत्यर्थः॥ स्यसंतमुदारउन्नतचित्तः॥ अतएवईश्वरःईश्वरोंतेनियमयंतीतीन्द्राः क्विप्रत्ययः तेषुवरःश्रेष्ठःब्रह्मांडोरसादिहेतुभूतवैराजादीनांप्यातंत्र्येणनियामकइत्यर्थः परमोरुविक्रमः पराक्रवर्णवर्णविचित्रपिच्छलनोत्कृष्टमाकांनिर्यस्यसचसावुरुर्महागुणःऊणुञ्आच्छादनेइत्यस्मातमहतिरूस्वश्चेतिकुप्रत्ययोनुलोपोरूस्यश्चेनिष्पन्नउरुशब्दोमहागुणवाचकः सचासौविःपक्षीगरुडस्तेनक्रमःसंचारोयस्यसः यद्वापरमउत्कृष्टःउरु

देवक्यांवसुदेवतःसमहत्नानंदोव्रजेंदुर्यदोभूभारोद्धरणायसन्मधुपुरेवंत्रोरूपांभोनिधिः॥ भक्तानांसुखमुन्नमंस्तनुपादिरूनिजानांहर्जिन्नेह्यपरतिष्यसंत्तयुगयोःसंधौमुदिमाकृतिः॥२६॥ महान्विक्रमः पराक्रमोयस्यसःइत्थंभूतएषभगवान्दिव्यममानुषंपुरुबहुलंपरमुत्कृष्टंतपोविधायकृत्वाप्रतिघस्रंप्रतिदिनंअव्ययंविभक्तिसमीपेत्यादिनाव्ययार्थवीप्सायामव्ययीभावः तस्फलंतस्यतपसःफलंतपोजन्यंफलंतमित्यर्थः प्रवृत्ताभ्यःस्वभक्तजनेभ्यः ददातिप्रयच्छतितथाचोक्तंभागवतेभारते॥ विवर्षेभगवान्नरनारायणाख्यआकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपपन्नामोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपयातयोऽव्यक्तगतिश्चरतितिनिपेव॰

 ज्यात्मलम्॥२३॥देवकक्ष्यामिति॥व्रजेंदुर्व्रजचंद्रः दिव्यव्रजभूमौ चंद्र इव प्रकाशनामानंदस्यार्थः कृपांभोनिधिर्दयासागरः 
 सहजानंदः सहजः स्वाभाविकः आनंदो यस्य सः यद्वा सहजः अकृत्रिमः आनंदो यस्मात्स यद्वा॥सहंते द्वंद्वा
नीति सहाः यद्वा सहश्च जायं ते इति ताः जनाः अस्मेश्च पितृमणते इस पितृग्रहणान्निरूपपदाज्जनिधातो ईप्रत्ययः
ते च ते ते च ताना नंदयंतीति आह पूर्वोक्तेतुमणिजंताना तु नंदि समृद्धौ विसर्गा सचाद्यश्च॥यद्वा॥सहेभ्यः वृत्तेभ्यः
भक्तेभ्यः जायते श्रोत्रजनेष्वा विर्भवतीति पंचम्यामजातावितिजने र्डः यद्वा सदेषु भक्तेषु जायते आविर्भवतीति
सहजः सप्तम्यां जनेर्ड इति जनिधातो र्डः आनंदयतीति आनंदः सचासौ सचयद्वा हंतिजनानिति हः कालः व्याकुल
कांक्षते रौणादिकोटप्रत्ययः तेन सह वर्त्तमानाः सहः तेच ते जातीवाश्चताना नंदयतीति॥यद्वा हः कालः जो जन्म
जो जन्म निजने देहे इति रत्नकोशः सचसच॥ताभ्यां सहिताः सहजास्ताना नंदयतीति॥यद्वा नामैकदेशेन नाम
मात्रस्यापि ग्रहण मितिमायात्॥सनूहेन सदाशिवः हनूहेन हरिः जनूहेन जनको ब्रह्मा॥सचसचसचताना नं
दयतीति॥यद्वा नंदयती तिनंदा सहजा आसमंतान्नंदासमृद्धिर्येष्वेति सकलजनानां स्वदर्शनेनानंदाविर्भा
वात्समृद्धिर्नंदेस्युच्यते॥यद्वा सहते भक्तापराधानिति सहः जायते भक्तानुग्रहार्थे अनेकरूपेणेति जः आनंद
यति भक्तमंडलमिसानंदः पश्चात्कर्मधारयः यद्वा सहते तपः क्लेशमसौ सहस्तथाभूतो जो देहो येषां ताना नं 

दयतीक्षणमुखेन प्रीणयतीति सहजानंदः यस्तपः क्षीणदेहानां स्वमूर्त्तिदर्शनदातेत्यर्थः यद्वा सहजायंते इ
ति सहजा भक्तास्ताना नंदयतीति अथवा सहजाः स्वप्राकट्यसमये स्वस्मिन्नुत्प्रकटतया दृश्यमाना ये ज्ञानवैरा
ग्यैश्वर्यादयो गुणाः तैः आनंदयति स्वशरणागतनिर्मलांतःकरण पुरुष रूपदर्पयुततत्स्य पने नताननुकरयती
ति तथोक्तः कस्यचिदाह इति कतृणोभना दिवा अप्राकृता सच्चिदानंदमयी आकृति: श्रीमूर्त्तिर्यस्यासौ ताप्येवंवि
सस्कवबोधतना च वनंत इति विश्लोकः मनरना राययणा वनारधर्त्ता हरिर्वासुदेवाव भूभारोद्धरणाय भूभारभूता
कणानुकर्त्तुमुन्मूलयितुमित्यर्थः तुमर्थाच्च भाववचनादितिचतुर्थी॥सदस्माहिं नयन्मधुपुरं तस्मिन् तत्रापि य
दोः पितृजारा धर्मत्रीत्यस्य यान्ग्रहणादिनाय दुवंशं नृपस्यवंशे अन्वाये वंशे अन्वाय संतानइत्यमरः तत्रा
पिवसुदेवतः वसुषुदीप्यतिइति॥दिवुक्रीडादौ पचाद्यच्॥वसुदेवस्तस्मादितिवसुदेवतः पंचम्यास्तसिलु वसु
देवाख्यस्वजन्माईक्षत्रियात्॥देवक्यां देवकपुत्र्यां स्वजनुषा स्वजन्मना जनुर्जननजन्मानी समरः निजानामात्मी
यानां भक्तानाभुद्धवादीनां॥उत्तमं सहस्रं भोजनत्राप्यनासनादिनोत्कृष्टं सकरं दिशकर्त्तुमिच्छन् सनूदहते: स
नंताडुः प्रत्ययः द्वापरो द्वापरारव्यपुगं च तिष्यः कलियुगं च तौ संज्ञानामययोस्ते द्वापरः संज्ञायेयुगे तिष्यः पु
ष्ये कलो धात्रामितिचविश्वः तेच ते युगे च तयोः युगं हस्तादो युगलेइतिविश्वः संधौ संघट्टने मेलने इति यावत्

संधिर्भेदे करंगायां भग्ने संघट्टने ऽपि चेति विश्वः जज्ञे संजातः जनिधातोः कर्त्तरि लिट् शार्दूलविक्रीडितं वृत्तमेतत्॥
२४॥ अधर्ममिति सगन्वयः कर्मो वाक देवो वा स एव ससतिः सतां साधूनां ससस्सेवापतिः स्वामी देसांतरार्येषु
रवस्सैः प्रवर्त्तितं कृतप्रवृत्तिकलावेव संभवोयस्य तम् दुःखेन वा ऽन्तेनानाशयस्य तथाभूतम धर्मस्वरूपाख्या
सहितं धर्मप्रतिबंधकत्वं यदेनस्तत्कृतं पापं च तेनो ऽपराधकलुषइति विश्वः आलोक्य दृष्ट्वा तयोरधर्मेनसोरिदं
अधर्ममालोक्य स एव सस्सतिर्दुरंतमेनः कलिसंभवं च यत् ॥ इयेष देसांतरगुरुप्रवर्त्तितं तदीयमूलोत्खननं निजे
ज्ञया ॥२५॥ धर्मस्थापयितुं दयालय इति श्री धर्मदेवात् क्षितौ निष्कामोद्युविधातुमं वुदरुचिर्भक्तो मुमुक्षून्नरान्
उद्धर्त्तुं पतितान् यमाद्गणितान्देवः करेन्द्राधिपो जज्ञे कोसलदेशतः सहरिमुकुंदमाभिधानः प्रभुः ॥२६॥ तदी
यं यन्मूलं भ्यो मूलानां वोत्खननं तं तस्मादनं कर्त्तुमिति विग्रेषः निजेच्छातमात्मीयबलेनैव ईज्रोबलेचदीप्तोचेति वि
श्वः इयेष ऐच्छत् न भूतो मया तत्कर्त्तेति स्वयमेव च्छ्रांच कारे समर्थः वंशास्यक्रन्न ॥२७॥ धर्ममिति ॥ करणामिद्रादी
नांईन्द्रादिब्रह्मादयस्तेषामधिपो भर्त्ता देवदेवेन्द्रादीनां मपि ऽनेकापद्भ्यो रक्षणं कर्त्तुं समर्थः देवः दीव्यति क्रीडति
ब्रह्मांडे भक्तहृत्सद्मे वा आनंदघनमूर्त्तित्वेनेत्यर्थोक्तः ॥ यद्वा ॥ दीव्यति क्रीडति विश्वं यस्मिन्निति यद्वा दीव्यति वि ॥१५॥

जिगीषति पार्षदैरिति यद्वा दीव्यति विजिगीषति स्वकीयानामंतः शत्रूनिति यद्वा दीव्यति व्यवहरति कर्मफल
दानादिभिरिति ॥ यद्वा दीव्यति द्योतते स्वप्रकाशेनेति ॥ यद्वा दीव्यति स्तौति सन्मार्गमिति ॥ सप्तपक्षेपि पचाद्यच् ॥ यद्वा
दीव्यते स्तूयते भक्तसंघैरिति अकर्त्तरि च कारके संज्ञायामिति कर्मणि घञ् यद्वा दीव्यति निर्गीयते ऽभक्तहृदये इति ॥ हृद्यंतःस्थो
ऽपि दूरस्थोत्यूनामान्नपदांतवेति श्री भागवतोक्तेः ॥ यद्वा दीव्यति मोदते भक्तदर्शनेनेति ॥ यद्वा ॥ दीव्यति गच्छति
स्वभक्तगेहेष्विति तत्थोक्तः पक्षत्रयेपि पचाद्यच् प्रभुः कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थः सः कर्मो वाक देवो वा
दयालयः दयाया निष्कामकारुण्यस्यालयो मंदिरं यद्वा ददाति करवमिति दः इदान्नुदाने स्मान्मूलविभुजादि
राकृतिगणात्वात्कः आतो लोप इट्याति भक्तांगणामिति यः पूर्वपुत्कः आलिनोति आश्लिष्यति भक्तानिति
आलयः आङ्पूर्वात् लीश्लेषणे ऽस्मात् सचाद्यच् ॥ ततः सर्वेषां कर्मधारयः यद्वा दयते कालरूपेण सर्वान् हिन
स्तीति दयः नास्ति लयो यस्यासावलयः सदा सौ सच ॥ यद्वा दयंते रक्षंति स्वशरणागततनान् भक्तिमार्गोपदेशेनो
नकाद्यसर्पादिति दयाः भक्तास्तेषां आलयो निवासस्थानं यस्येति ॥ यद्वा दयते गृह्णाति शरणागतकर्माणीति द
यः सदासावलयो लयनिवर्त्तकश्चेति ॥ यद्वा दयंते हिंसंति असन्मार्गोपदेशेन लोकानिति दयाः पाखंडिनः ते
षामासमंताल्लयो यस्मादिति अत्र पक्षचतुष्टयेपि यदानगतिरक्षणहिंसादानेषु अस्मात् सचाद्यच् ॥ यद्वा ॥

यांस्तुनंतीतिदयालोनिर्दयाः अमेधपिहद्युपतइतिसर्वोपाधिव्यभिचारार्थापित्रादिविहितरप्रसयनिष्पन्न पसिवाशाब्ब्र वद्गुनातेर्ईप्रसय: टिलोपश्चैते प्रोयातिदूरंगच्छतीनितथाभूत: इतिहेतो: क्षितोएथिव्यांधर्मचा तुर्वर्ण्यधर्मस्थापनपूर्वकमेकांतिकभक्तजनधर्मस्थापयितुंतत्स्थापनेनतत्रत्तनाम्नवर्त्तयितुमिसर्थः मुमु क्षून्संसृतिनिबंधनान्मोक्तुमिच्छून् नरान् मानवान् नरोजेमानवेः ऽर्जुनेइतिविश्वः निर्गतः सांसारिकविषयेषुवि षयेभ्योवाकामइच्छायेषांतान् यद्वा कामान्मदनान्निक्रांता निष्कामाः निरादयः क्रांताद्यर्थेपंचम्येतितत्पुरु षः तान् यद्वाकाम्यंतेइतिकामाभगवद्गुणास्तेनिरतिशयेनयेषुतेतान् यद्वा निष्कंवक्षोलंकरणभूतपद कदीनारादिरूपंस्वर्णममोरोगइवयेषांतेतान् निष्कमस्त्रीसाष्टहेमवातेदीनारकर्षयोः वक्षोलंकरणेहे मपात्रेहेमपलेःपिचेतिविश्वःमेदिनो अमोरोगेतच्छिद्रोषइतिविश्वः यद्वानिर्निःशेषंकंकामक्रोधलोभस्ने हमानजमंस्वत्वंतदमइवक्षयादिरोगइवभीतिकरंयेषांतेतान् कं वारिसुखमूर्द्धस्विति विश्वः विधातुंकर्तुं अगणितान् असंख्यान् पतितान्नाम्नाधिकारदूरीभूतानपियमात्मीयस्वतापनानांयथापराधंदंडदा तुर्वैवस्वतात् उद्धर्तुं कृपालुं भपिवोम्नेतुचक्रोसलदेशात् कोसलदेशात् कोशलदेशोभाद्यादित्वात्तसिः श्रियासद्धर्मसंपसापुक्तोयोधर्मदेवस्तस्माद्वृषनामोपरपर्यायाद्धाइवादिसर्थः भक्तोभक्त्याख्यायायोवि 

तिभांबुरवन्नवनीलमेघवद्युतिः कांतिर्यस्यसतथाभूतः सन् हरियुद्धमाभिधानः हरिणाहरिनाम्नेनस हयुक्तंइतिहरियुक् द्धमइत्यभिधानंद्धमाभिधानंहरियुक्तद्यस्यहरिद्धमनामेसर्थः जलवाद्भुर्वभव ग्राहूलविक्रीडितंवृत्तं ॥२५॥ इत्थमुपोद्घातंसमाप्यप्रकृतंश्रीहरिचरित्रंवर्णयितुंप्रस्तौति वृषेतिहरेर्जना नांभक्तानामसतिशयेनश्रमेस्वत्वंतस्पदंतत्प्रददातीतिवाभवएवाबुनिधिः समुद्रस्तस्मात्तारणंतारणमे वतारणंतत्रप्लवोनौकास्वरूपंप्लवशब्दोनियतपुंल्लिंगोपेदिमाम् श्रुतमेवसतप्रकटभगवतोविभुत्वमाहा त्म्यभक्तिरूपमश्रुभजन्मकर्मणामनुवर्णनंहरिजनातिशर्मदम् ॥ विदधेभवांबुनिधितारणप्लवः श्रुतमेवसंग्र यहं समासतः ॥२६॥ बदरीवनं भवति भारते हरेर्नरयोगिनः प्रथितमत्रवर्षके ॥ चिरतीर्थसिद्धमुनिमण्डलानि यत्करनिम्नगावहतियस्यसन्निधौ ॥२७॥
तस्यगुणेश्वर्यादिषु अनिश्चयरूपसंशयहरं वृषोधर्मस्तस्यभक्तिर्म् र्सपरनामाचरूपमः स्वामिनारायणापरपर्यायोभगवांस्तुतेषांशुभानिजन्मानिप्रादुर्भावाः कर्माणिचरित्रा णिचतेषामनुवर्णनंप्रबंधनिबंधनेनकीर्त्तनंअहमचिंसानंदनामाकविः समासतः संक्षेपेणविदधेकरोमि काव्येननिबध्नामीसर्थः स्वमंगलाचरणमुसजसाजगौभवतिसामुमंगलेतिलक्षणात् ॥२६॥ बदरीतिअत्र

भुवितत्रापिवर्षकेजंबूद्वीपेवर्षेसवत्सरेदृष्टोजंबूद्वीपेइतिविश्वः स्वार्थेकन् ॥ तत्रापिभारतेभरताख्येखंडेभारतंप्र
थमंर्दस्मात्वर्षभेदेइतिमेदिनी नरेणयोगोभ्रातृतयासंगतिरस्यास्तीतितथोक्तः अतइनिवनाविनिमतुवर्थी
यइनिः तस्यहरेर्नारायणस्यबदरीवनंबदरिकाश्रमः प्रथितंविख्यातंभवतियत्यत्रचिरंजीविनश्चतेयेसिद्धाश्च
मुनयश्चतेषांमंदिराणिभवंतिभवतीसत्रवचनविपरिणामः कार्यः यस्यबदरीवनस्यसन्निधौसमीपेसन्निधिःस
न्निधानेऽपीतिविश्वः सुराणांदेवानांनिम्नगानदीआकाशगंगावहतिप्रवहति ॥ पूर्वश्लोकोक्तंवृत्तम् ॥ २१ ॥

अतितुंगमयंपरितोऽस्यविराजतेक्षितिहिमगिरिरमणीयतरोऽद्रिराट् ॥ रजतदुर्गसमानवरद्युतिर्यदनुभासयति
प्रतिवासरम् ॥ २२ ॥ अतितुंगमिति अस्यबदरीवनस्यपरितोविष्वक् समंततइत्यर्थः अद्रीणांपर्वतानांराजते
तिअद्रिराट् क्षितिधराधिपः रमणीयतरः रम्यतरः हिमगिरिः हिमाचलः अतितुंगयंयथातथाविराजतेशोभ
ते रजतस्यरूप्यस्यदुर्गः प्राकारस्तेनतस्यवासमानावराश्रेष्ठाद्युतिःकांतिर्यस्यदुर्वर्णंरजतंरूप्यमित्यमरः ॥
यद्वारजतः शुक्लोयोदुर्गस्तेनसमानवराअसुलभाद्युतिर्यस्यारजतंत्रिषुशुक्लेस्यात्क्लिवंहारेचदुर्वर्णेइ
तिमेदिनी ॥ यद्वा रजतदुर्गसमासर्वतस्करूपानवासदेवनचानवज्ञासमानारस्याग्नेरिवद्युतिर्यस्मिन्नसः रःस्मृतः ॥१७॥

पावकेतीक्ष्णेइतिमेदिनी एवंविधोहिमालयः यद्बदरीवनंप्रतिवासरंप्रतिदिनंअनुभासयतिप्रकाशयतिइ
तः परंश्लोकानांद्रुतविलंबितंछन्दः द्रुतविलंबितमाहनभौभरौवितिलक्षणात् ॥ २२ ॥ तुहिनेतिकिंचेतिचार्थः
यस्यवनस्यसमीपतः समीपेआद्यादित्वात्तसिः तुहिनंहिमंतस्ययोभूधरोभूभृत्तस्यतस्मिन्वायेनिर्झराणां
संचयाः प्रस्रवणानांनिचयाः उत्साः प्रस्रवणंवारिप्रवाहोनिर्झरोझरइत्यमरः परिवहंतिसमंततोनिवहंतिय
तः पत्रआद्यादित्वात्तसस्मात्तसिः फलानांसस्यानांभरैर्भारैः फलंजातीफलेसस्येइतिमेदिनी अवनताः

तुहिनभूधरनिर्झरसंचयाः परिवहंतिचयस्यसमीपतः ॥ प्रविलसंतिविचित्रपलाशिनोफलभरावनताः परितो
यतः ॥ २३ ॥ मधुरसाकदलीबदरीश्रितः पनसकेनिलदाडिमशोभितः ॥ क्रमुकनीपरसालमुखैर्युतोऽस्त्यग
णितैः प्रथितोद्रुभिराश्रमः ॥ २४ ॥ तस्याः विचित्राः नानाविधाः पलाशिनोद्रुमाः पलाशीद्रुद्रुमागमाइत्यमरः परि
तः प्रविलसंतिअतितरांभांति ॥ २३ ॥ मधुरेतिमधुरमधुरोरसोयस्योस्तोमधुरसास्तामधुरेअन्वेदिनिवोपालितः तयो
क्तेयेकदलीबदर्यौताभ्यांश्रितआश्रितोयुक्तइतियावत् यद्वा मधुरसाद्राक्षाकदलीरंभाबदरीकर्कंधूस्ताभिः
श्रितः भवेन्मधुरसाद्राक्षेतिमेदिनी ॥ यद्वा मधुरसामूर्वा मूर्वादेवीमधुरसेत्यमरः श्रीपर्णेदेवत्पनसः कंटकिफ

 लः पनसः कंटकिफलइत्यमरः केलिलोऽरिष्टः अरिष्टके निंबोऽस्त्रमाविग्यमरः दाडिमः करकाख्यो वृक्षविशेषः 
॥१८॥ दाडिमस्तु त्रिलिंगः स्याद्देलायां करकेपिचइतिमेदिनी॥ तयोक्तैः शोभितः संजातशोभः तारकादेराकृतिगण
त्वादितच् क्रमुकः पूगारव्यपिप्पलभेदः तुदस्तु पूगः क्रमुको ब्रह्मण्यइत्यमरः यद्वा क्रमुकः पूगवृक्षः॥ क्र
मुकस्तु पुमान्भद्रमुस्तके ब्रह्मदारु णि फलेकार्पासिकायांच पट्टिकालोध्रपूगयोरितिमेदिनी नीपः कदंबः
नीपप्रियकदंबास्तु हलिप्रियइत्यमरः रसालः आम्रश्च आम्रश्चूतो रसालोऽसावित्यमरः तेमुख्या निमुख्या
बकुलचंदनचंपकमल्लिकाकुरबकस्थलपंकजसंचयः॥ ककुभकेतककल्पतरुश्रितोरुचिरकेसरपर्णमु
निद्रुमः॥२५॥ येषांतैः अग्राणि तैरसख्यातैः द्रुमिर्द्रुमैः युतोयुक्तः आश्रमोनारायणाश्रमः पृथितो विख्यातो
ऽस्तिनात्रप्रमाणापेक्षास्ति॥२४॥ बकुलेति बकुलः केसरश्च अथकेसरेबकुल इत्यमरः चंदनंमलयजंच चंदनो
ऽस्त्रीमलयजइतिमेदिनी चंपको हेमपुष्पकश्च चंपको हेमपुष्पकइत्यमरः मल्लिकाविचिकिलं च मल्लिकाविचि
किलंविचक्षणाइतिहलायुधः कुरबको निंबश्च निंबे कुरबकइतिमेदिनी स्थलपंकजं स्थलनलिनी चतेषां संच
याः समूहायस्मिन्सतथोक्तः ककुभोऽर्जुनकुः अर्जुनं ककुभंपाकुरितिहलायुधः केतकः केतकीद्रुमः कल्पत ॥१८॥

रुः कल्पद्रुमश्चतैः श्रितः तेषां निवासभूमिरित्यर्थः केसरः पुन्नागश्च पुन्नागेपुरुषस्तुंगः केसरो देववल्लभइत्यम
रः यद्वा केसरो नागकेसरः चांपेयः केसरो नागकेसरः कांचनाह्वयइत्यमरः पर्णः किंशुकश्च पर्णेपत्रे किंशुके
नाइतिमेदिनी मुनिद्रुमाअगस्तिवृक्षश्च रुचिरास्तेयस्मिन्सः पूर्वोक्तआश्रमोऽस्तीत्यन्वयः॥२५॥ वृषेति यत्रयस्मि
न्नाश्रमे वृषाम् षिकास्तान्निपातयंतीति दंतांतीति वृषविपाटिनो वृषदंशकाः वृषः स्यान्मूषके धर्मे सौरभेये च शुक्र
लेपुरांत्रिभेदयोः शृंगिणां मूषिकश्रेष्ठयोरपि ओतुर्बिडालोमार्जारो वृषदंशकआखुभुगितिविश्वामरौ तंदुरुभि
वृषविपाटिनतंदुरुभिर्दंष्ट्रकैः फणाभृतोनकुलैश्चगलैः श्वपाः॥ मृगगणैश्च तरक्षुगणाद्विपैर्द्विरवराः करदैश्च विना
दनाः॥२६॥ गारवुभिः तंदुरुर्मूषिकोऽप्याखुरित्यमरः फणाभृतो लेलिहानाः लेलिहानो द्विरसनो गोकर्णः कंचु
कीतथा कुंभीनसः फणाधरइत्यमरः वृके तंदुरैः आधोगंताजुखनकोचकः पुंध्वजतंदुरइत्यमरः नकुलैः पश्च
विशेषैश्च नकुलः पांडवेपन्नगारिविति विश्वः श्वपाः सारमेयश्रेष्ठाः कौलेयकः सारमेयः कुक्कुरो मृगदंशकः शु
नकोभषकः श्वाश्वादित्यमरः छगलैः अजैः बस्तच्छगलकाअजेइत्यमरः तरक्षुगणा मृगादनसमूहाः तरक्ष
स्तुमृगादनइत्यमरः ~~द्विपैर्द्विरदैः~~ [illegible]

हरिसं.
॥१९॥

मृगगणैः कुरंगैः मृगेकुरंगवातायुहरिणाजिनयोनयइत्यमरः हरिर्वराजरसिंहः सिंहोमृगेंद्रः पंचास्योहर्य सर्ग.३
क्षः केसरीहरिरित्यमरः द्विपैर्दंतिभिः दंतीदंतावलोहस्तीद्विरदोऽनेकपोद्विपइत्यमरः ॥२६॥ पशुगणाइतिपु
रुः प्राज्ञोयोमस्युः क्रोधस्तेनयुतायुक्ताः अतिक्रोधिनइत्यर्थः पुरुः प्राज्ञेऽभिधेयवदितिमेदिनी मन्युर्दैन्येक्रतौ
क्रुधीत्यमरः इमेनुक्तप्रकाराः पशुगणाः पशूनांसहजवैरवतांमार्जारमूषकादीनांकुलानिकुलंगोत्रेगणेइति
विश्वः परस्परमन्योन्यम् सहजवैरंस्वाभाविकवैरभावम् तथोक्तप्रकारेणअपास्यसन्त्यक्तापन्नावोविपशुदेहः

पशुगणाः पुरुमन्युयुतास्तथासहजवैरमपास्यपरस्परम् ॥ मुनिकृताङ्क्वसंदधतेमुनेर्व्रतमिमेपत्रावोऽपिहिय
त्रसत् ॥२७॥ मुनिगणाश्चरुकर्षिमुखाः सदाभगवतोगुणगायनमाश्रमे ॥ विरचयंतियत्रयातक्रतोः पुरत
एतमयुप्रवराः शुभाः ॥२८॥
भाजः संतोऽपिमुनिकृताङ्ववैरवानसमर्थ्यपसानियथासन्नारायणाभ्यर्हित
म् मुनेः व्रतंवृत्तिम् संदधतेहिनिश्चितमेवेतिद्वयोरेकान्वयः ॥२७॥ मुनिगणाइतिकिंचेतिचार्थः यत्रआश्र
मेरुकर्षिर्नारदोमुखंमुखांयेषांतैः मुखंतुवदनेमुख्यइतिवैजयंती मुनिगणाः कलापग्रामनिवासिऋषिस
मूहाः गणः प्रथमसंख्योघइतिमेदिनी मनुप्रमुखाइतियावेसावर्णिमनुमुख्याः मुनिगणानारदादिमुनि ॥१९॥

व्रजाः सदानिसम्भगवतोनारायणमुनेः पुरतोऽग्रेएत्यागसत्रातक्रतोरिंद्रस्यपुरतः एतशुभाः मयुप्रवराः किंन
रश्रेष्ठाः वइवदेवगायकायथेत्यर्थः मयुर्नाकिंनरेमृगेइतिमेदिनी वंप्रचेतसिजानीयादिवार्थेचतदव्ययमितिमे
दिनी गुणगायनंभगवतोभक्तवत्सलत्वादिगुणगानमुगायतेभौवेत्युद विरचयंनिकुर्वंति ॥२८॥ उच्चैरिति तदं
तरगतातस्यनारायणाश्रमस्यदंतरंमध्यंतद्गताआश्रममध्यप्रदेशेस्थितेइत्यर्थः संस्पर्शनंस्पर्शाख्येक्षण
मालोकस्तनाभ्यांयोमलोजनानांपापंतंक्षपयतिनाशयतीतितथोक्ता मलोऽस्त्रीपापविट्किट्टान्यमरः उच्चैरु

वसंत
उच्चैस्तदंतरगतेतितरुर्नवेद्यासंस्पर्शनेक्षणमलक्षपणाविनद्धाला ॥ नारायणापचितयेबदरीस्फुरम्यंतद्रूपतः
पदमवस्थितमक्षराख्यम् ॥२९॥
लताविनद्धालारातदाख्यामहापरिणाहावाबदरीककंधूतरुः तरुर्वृक्षः इ
तिनवेद्यानवोध्याकिंतुनारायणापचितयेनारायणर्षिपूजांकर्तुम् ॥ क्रियार्थोपपदस्येसादिनाकर्मणिचतुर्थी
तद्रूपतोबदरीवृक्षाकारेणआद्यादित्वान्ततीयांतात्तसिः अक्षरंब्रह्मपुरापरपर्यायमक्षरब्रह्मेत्याख्यायस्यत
त् स्फुरम्यमतिशायेनरमणीयम् पदंस्थानम् अवस्थितम् इतिवेद्यम् वेद्यमितिलिंगविपरिणामेनयोजनीयम्
पूजाप्रमस्यापचितिरित्यमरः इतोद्वादशश्लोकानांवसंततिलकावृत्तम्उक्तावसंततिलकातभजाजगौगइतिलक्षणा
त् ॥२९॥

नारायणस्येति सनरस्यस्वभ्रात्रानरेणसहितस्यनारायणस्यनारायणाभिधभगवतः वासेनुष्पत्तेःस्मिन्निति वा
सस्तस्मिन् निवासभूतेइत्यर्थः अकर्त्तरिचकारकेसंज्ञायामितिअधिकरणेवसनेघञ् यत्रआश्रमेस्थिताः कृतप्र
तिष्ठाः परमेआकल्पविधेयत्वात्सर्वोत्कृष्टेनैष्ठिकधर्मेनैष्ठिकाभिधवर्णिनःआचारेनिष्ठास्थितिर्येषांतेतथोक्ताः
मुनयोऋषयः प्रहृष्टमनसः भगवद्दर्शनेनातिप्रसन्नचेतसः संतः अखिलाश्चदिक्षु विकीर्णलग्नमुसकलदि
ग्विदिक्प्रसृतमित्यर्थः ऋष्टयः स्वरस्तेनमनोहरश्चित्तहारकोयोवेदानांनादउच्चारणंतम् उच्चैः प्लुतस्वरेणकु

नारायणस्यमुनयः सनरस्यवासेयत्रस्थिताः परमनैष्ठिकधर्मनिष्ठाः ॥ उच्चैःप्रहृष्टमनसोऽखिलदिग्विकीर्णंकुर्वं
तिस्मस्वरमनोहरवेदनादम् ॥ ४० ॥ आगसयत्रबलतृणलिक्षराधिनाथोहत्त्राक्षरप्रमथनोद्भवविप्रहृत्साम् ॥ हरी
चकारहरियादसरोजसक्तस्तत्रोद्धवोऽप्यवसदाप्यहरेःसदाज्ञाम् ॥ ४१ ॥ र्वंतिवेदोदितचरित्रैर्भगवंतंस्तुवंतीति
भावः ॥ ४० ॥ आगसेति यत्राश्रमेआगसागमनंकृत्वा बलेनस्वस्यसैन्येनरूपेणसामर्थ्येनवाबृणलेनेत्रोभंतेइसे
वेत्रलिप्येक्षरावरुणाद्योदेवास्तेषामधिनाथः स्वामीइंद्रः ताच्छील्येणिनिः बलेगंधरसेरूपेस्थामनिस्थौल्यसे
मयोःपुमान्हलायुधेदेसप्रभेदेवाप्यसेऽपिचेतिमेदिनी यद्वाबलतृणलीचासौक्षराधिनाथइंद्रः हत्त्राक्षरस्यप्र ॥२०॥

मथनंमारणंतेनतस्माद्धोद्भवोयस्याः साचासौविप्रहत्सावप्रहत्सानाम् हनस्तचेतिद्वंतेर्भाविक्वप्प्रकारांतादेवाश्च
लोकात्तर्त्तीत्वम् हरेर्नारायणस्यपादावेवसरोजेतयोः सक्तस्तत्रकृतेकचित्तः सन्नित्यर्थः हरीचकाराषापसृकारतत्र
बदरिकाश्रमेहरेःश्रीष्टदेवश्रीकृष्णस्य आज्ञानिदेशाम् आज्ञाधिगम्यआह प्रश्नेषोऽद्धवोऽयःसदानिरंतरम् ।उ
द्धवोऽपिअवसदुवासभागवतस्यापश्रीकृष्णनिदेशेनतत्रतन्निवसनंभागवततृतीयेकादशयोःप्रसिद्धम् ॥ ४१
तत्रेति तत्राश्रमेस्थिताः ननुभृतोदेहिनः प्रकृष्टायामुदहर्षःमासंजातायेषां तारकादित्वादितच् असानंदयुक्ताः

तत्रस्थितास्तनुभृतःस्मरलोभमानस्वादावलेपकुहकाद्यजयांतरारीन् ॥ जित्वाहरिंप्रमुदिताःसततंभजंतिब्र
ह्माण्डसंस्थितजनावजयोरुदर्पान् ॥ ४२ ॥ संतइत्यर्थः ब्रह्माण्डेषुसंस्थितायेजनास्तेषामवजयोविजयविधानंते
नोरुरतिशयितोदर्पोयेषांतेतथोक्ताः ब्रह्माद्यनेकमहानुभावविजयोत्थमहागर्वाइत्यर्थः तान् नास्तिकेश्चिद
पिजयोयेषांतेचतेतरारयोंतः शत्रवश्चस्मरःकामश्चलोभश्चमानश्चस्वादश्चअवलेपोगर्वश्चकुहकंकपटंचतामा
द्यानियेषांतेतेचतेःजयांतरारयश्चतानुस्मराद्यंतःशत्रून्जित्वानायासेनविजित्यहरिंश्रीनारायणंभजंतीतितथाभूतोप्य
माश्रमोयत्रसततनानांकामजयोप्यनायासेनतर्हिअन्येषांत्वकेषामकिंविलक्षणइतिकिमुवाच्यमितिफलितार्थः ४२

मांडव्येति तत्राश्रमे सशिष्याः शिष्यैः स्वस्वछात्रैः सहिता युक्ताः समेताः संघशो मिलिताः मांडव्यश्च पाणिनिश्च पराशर
श्च वामदेवश्च वाल्मीकिश्च पर्वतश्च बृहस्पतिश्च एतेषां द्वंद्वः अत्रिश्च गर्गश्च शुकश्च नारदश्च कर्दमश्च ते आद्या येषां
ते च मुनयो महर्षयः तस्य नारायणर्षेः ईक्षणाय ईक्षणं दर्शनं विधातुं क्रियार्थोपपदस्येत्यादिना कर्मणि चतुर्थी अ
भ्यगमन् अभ्याजग्मुः ॥ ४३ ॥ आगच्छंत इति बदरीविशालास्य तस्यास्तलमधो देशस्तत्र तिष्ठतीति तथाभूतः नरसख

मांडव्यपाणिनिपराशरवामदेववाल्मीकिपर्वतबृहस्पतयः समेताः ॥ तत्रात्रिगर्गशुकनारदकर्दमाद्यास्तस्येक्षणा
य मुनयो ऽभ्यगमन् सशिष्याः ॥ ४३ ॥ आगच्छतो मुनिवरान् ददर्श दूरान्नारायणो नरसखो बदरीतलस्थः ॥ यो दुष्करं
भरतखंडे वसन्निजेभ्यो दिव्यं प्रयच्छति विधाय तपः स्वकाय ॥ ४४ ॥ यो ब्रह्मभूतसनकादिकवामदेवव्यासात्मजप्रमु
खभव्यगुरुर्गुणात्मा ॥ संसेवता ह्यद्भुतगुणा मदनादिहंतुर्यत्पाद धूलिमपि मूर्ध्नि दधुरेते ॥ ४५ ॥

खामित्रमिति नर
सखः राजाहः सखिभिष्टिति निटचुसनारायणर्षिः आगच्छतो मुनिवरान् दूरात् दूरदेशादेव ददर्श ईक्षत यो नारायणः
भरतखंडे वसतीति तथाभूता ये निजाः स्वभक्तास्तेभ्यः दुष्करं दुःखेनापि कर्तुमशक्यम् स्वकार्थे स्वलं दिव्यं कंदरमुत
पः विधाय स्वकाय स्वकं स्वं प्रापयितुं तेषामिति शेषः क्रियार्थोपपदस्येत्यादिना चतुर्थी प्रयच्छति तत् हृदानि ॥ ४४ ॥ य इति ॥२१॥

गुणाः सत्वशौचादयः प्रथमस्कंधोक्ता एकोनत्रिंशत् ते आत्मानः स्वरूपभूता यस्य स तथोक्तः ब्रह्मभूता ब्रह्मणा
सहैक्येनात्मस्थिति इत्युक्ता ये सनकादिकाश्चत्वारो ब्रह्मसनत्कुमारश्च वामदेवश्च व्यासात्मजः शुकश्च ते प्रमुखा येषां क
श्यपादीनव योगीनां तेषां भव्यो योग्यः सो गुरुश्च अथवा जगद्विताय मनुष्येष्वाविर्भवतां तेषां भव्यो भाव्यो गुरुः भ
व्यं शुभे च सत्ये च योग्ये भाविनि तु त्रिषु इति मेदिनी यत् आत्मारामाणामपि गुरुरित्यर्थः ननु कथमेनमात्मारामा
अपि भजंतेति तत्राह समंतीति मदनश्च आदिर्येषां क्रोधादीनां तेषां हंतुर्नत्रिकस्यपस्य नारायणर्षेर्यतस्ते

संदर्शनं भवतु मे स्पृहयेयं मि जीतेत्सो वीक्ष्य तेन रखरौ बदरीतलस्थौ ॥ साक्षान्निहर्ति स्वकृतैनैकपरो निवासो धाम्नां
तस्थैव तपसामणिमादिसिद्धेः ॥ ४६ ॥

यः ताह्यद्भुतगुणाः संसेवयथ्या निष्कामा अपि एते सनकादयः यस्पादधूलि
मपि मस्तकमहात्म्यज्ञानेन मूर्ध्नि दधुः मूर्धसु धृतवंतो निष्कामैरपीत्थं सेव्यस्तर्हि सकामानां तु का वार्तेति भावः भग
वद्गुणानां निस्सत्वादिपूर्वकं भगवत्स्वरूपभूतत्वं सविस्तरं शिक्षापत्रार्थदीपिकाख्यटीकायां स्फुटमस्माव
ताराणां मिसेळाभिः आस्मादवसेयं निष्कामानामपि यो भजनीयस्तेनोक्तो भागवते आत्मारामाश्च मुनयो नि
र्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति ॥ ४५ ॥ संदर्शनमिति हरिर्नारायणर्षिः ॥

अस्य मद्भक्तस्य मे मम संदर्शनं सम्यक् दर्शनं भवतु तदायं तत् इत्येवं यं तं नमः इत्येवं दर्शनं दातुमिच्छां कुर्यात् स स्व
यं स्वदर्शनार्थं संकल्पितः पुमान् नरवरो नरश्रेष्ठो नरो नारायणश्च मातरिश्वेष्टेद्वे ति विष्णुः बदरीस्वाश्रमस्तु क्षेत्रं तस्मास्तथ
मध्ये भागस्तत्र तिष्ठतस्तो नित्यं तिरूपं यत्फलं तं धर्मस्तदेकमेव परं प्रधानं ययोस्तो धाम्नो दीप्तीनां निवासो
स्थानभूतो धाम रत्नमोगृहे दीप्ता विति विश्वः तथैव तपसां कृच्छ्रचांद्रायणादीनां ॥ यद्वा तपो नानाप्रकारास्तस्मिति
स्मृतेरनन्तानं कामममात्रासिवने तेषां नितरां वासो वसनं ययोस्तौ तपः स्वाध्यायवाक्यानामन्येषां चार्थानामाश्रयो
संक्रंदनत्रिनयनद्रुहिणादयोः स्यदेवाधिपास्तरतमत्वतईश्वरस्य ॥ जानंति येऽक्षरपदाजगदाश्रयस्यश्वेतां
तरीयभवनाः परमं प्रभुत्वम् ॥४१॥
अणिमादिभिः सिद्धिभिः सेव्यो सेवनार्हो आदित्याद्येन भगवतां द्वयाच्चैश्वर्य
दिग्रहणं तथा भूतो नरनारायणौ विति निर्घोषः साक्षात्सुसक्षम अन्वीक्षते पश्यति स्म संकल्पितः पत्र प्रेत्स्तं ना
मइत्यर्थः ॥४२॥ संक्रंदनेति संक्रंदनस्त्वराणा दिद्वंद्व इतियावत् संक्रंदनोदुश्च्यवनस्तुराषाडित्यमरः स च त्रिन
यनो धूर्जटिः विरूपाक्षस्त्रिलोचनः कृतयो गुरवोताः सर्वज्ञो धूर्जटिरित्यमरः स च द्रुहिणो धाता धाताब्जयोनिर्द्रुहिण
इत्यमरः स च तत्प्रादयो येषां ते तथोक्ताः ये देवाधिपा देवाधिपतयः ये च श्वेतांतरीयभवनाः श्वेतद्वीपपूर्वको ॥३३॥

यो ऽंतरीयो द्वीपः स एव भवनं तस्मिन्नेकांतधर्मानुष्ठानार्हत्वात् किंचिदप्यन्तरायाणां छेदकं स्थानं विद्यते नित्यसंबं
धतया एषां ते तथोक्ताः श्वेतद्वीपवासिनो मुक्तगणा इत्यर्थः अणुरूपादिभ्यो ऽजितिनित्ययोगे ऽधुप्रत्ययः भूमि
निंदाप्रशंसासु नित्ययोगे तिशायने ॥ संबंधे ऽस्तिविवक्षायां भवंति मतुबादय इति वचनात् ॥ ये च अक्षरपदाः
अक्षरपदं ब्रह्मपुरपर्यायमक्षरस्थानं विद्यते नित्यसंबंधतया एषां ते तथोक्ताः ब्रह्मपुरनिवासिनो महामुक्ता
इत्यर्थः अत्रापि पूर्ववदप्रत्ययः पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः तेसर्वे यन्तदो नित्यसंबंध
मन्नूतनांबुधरकंदरनीलगात्रो जुष्टो गणैः परममंगलसद्गुणानाम् ॥ आजानुदीर्घरमणीयभुजावनंगविस्मापनो
ज्ज्वलहिमद्युतिसुंदरास्यो ॥४३॥
धान्तच्छत्राध्याहारः जगदाश्रयस्य तात्स्थ्यात्ताच्छब्द्यमिति न्यायेन तत्र स्थितजनसमु
दायस्य जगतः आश्रयस्य आनमत्तया आश्रयणीयस्य ईश्वरस्य चिदचिदंतर्यामितया कर्मफलदातुः अस्य नारायणमु
नेः अत्र प्रकरणेन पर्यायोक्तविधया च नारायणर्षेर्ग्रहणम् तरतमत्वतः परममस्तु त्कृष्टमभोभावः प्रभुत्वं पर
मेश्वरत्वम् जानंति ज्ञानेतरतमत्वं नाम एकैकतदुत्तरोत्तराधिकतया तन्माहात्म्यावबोधनमित्यर्थः एवंभूतमहिम
वान् भगवान् मुनीन् दूरादद्दर्शेतिच तुर्णामेकवाक्यता ॥४४॥ अथ चतुर्भिर्मुनिदृष्टं भगवंतं वर्णयन्नालापय

केनाहमसदिति तत्र सर्वमुनयस्तो नरनारायणौ वीक्ष्य प्रणेमुरिति च तुर्थेनान्वयः तौ विशिनष्टि सन्मार्हितौ नूतनौ नवीनौ यौ तोयधरौ मेघस्तस्य कंदरे रमणीयं नीलं यद्रूपं गात्रं यं गयोस्तौ परमात्मस्य सुलक्षणमंगलामंगलकारिणः संतः ससाधवेगुणास्तेषां गणैः कुलैः जुष्टौ सेव्यानु पेक्ष्यंताव पेतावेतैः सादरेणासेवितौ अप्रलानुजानूमर्यादीकृस्यदीर्घौ रमणीयौ भुजौ ययोस्तौ आज्ञानुबाहू अभिविधौ रिस्ममयीभावः विस्मापयेते इति विस्मापनम् विभिडीषद्यसने ग्रस्माद्धि पूर्वाद्धेतुमति चेति हेतुमणि चित्प्रचो जिन्नीति नित्वौ एचो यबाया वइसायादेशो च नंदिग्रहीसा

प्रेष्ठोद्भवप्रमुखदल्लसमावतंससंराजमानपुरटाभजटाकलापौ ॥ मंदस्मितप्रविलसद्रदकुंदपंक्तीप्रोत्फुल्लसारनवपंकजपत्रनेत्रौ ॥ ४९ ॥

दिनाकर्त्तरि ल्युस्तस्य युवोरनाकावितिअनादेशः अनंगस्य कामस्य विस्मापनं विस्मयकारकमुज्ज्वलं दीप्यमानं हिमद्युतिरिवन्द्रास्तद्वच्छ्रकाचंद्रवत् सुंदरमास्यं मुखं ययोस्तौ एतेन स्वेक्षकजनानामात्मस्वरूपे चित्ताकर्षकत्वं वक्ष्यमाणप्रयोजनोपयोगार्थमुक्तमिति वेद्यम् अत्र सच्छब्दस्य साभ्यर्हितरूपोऽर्थस्कमस्वन्ते विद्यमाने च ससाभ्यर्हितसाधुष्विति विश्वकोशोक्तेः ॥ ४८ ॥ प्रेष्ठेति प्रेष्ठः प्रेयान् प्रियस्तमोशास्त्रकर्षार्थे अतिशायने तमबिष्ठना विती एच प्रत्ययः प्रिये स्थिरेसादिना प्रियस्य प्रादेशः तथाभूतो य उद्भवः प्र ॥३५॥

मुखो येषां सावर्णादीनां तैर्दत्तायेस्कमानां पुष्पाणां अवतंसाद्यो स्वराः स्त्रियः स्कमनसः पुष्पं प्रसूनं कुसुमं स्कमनिसमरः अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे इति मेदिनी तैः संराजमानाः पुरटाभाः स्वर्णकांतयः जटानां कलापा ययोस्तौ तथोक्तौ मंदेन स्मितेन प्रविलसंतौ ये रदाः दंतास्त एव कुंदकुसुमानां पंक्तयो ययोस्तौ रदो दंते विलिखने इति मेदिनी प्रकर्षेणोत्फुल्ले सारे श्रेष्ठे नवेनुत्ले पंकजपत्रसदृशे नेत्रे अक्षिणी ययोस्तौ सारो बले स्थिरांशे च मज्जिपुंसि जले घने न्याय्ये क्लीबं त्रिषु वरे इति मेदिनी ॥ ४९ ॥ पद्मेति पद्मा लक्ष्मीः लक्ष्मीः पद्मा

पद्मानिकेतनभुजांतरशोभमानराजीवहाररमणीयसितोपवीतौ ॥ राजत्सुदीपकलिकोपमरम्यनासौ गंभीरनाभिवरतुंदवलित्रयौ च ॥ ५० ॥

लयापद्मेत्यमरः तस्या निकेतनं स्थानं यद्भुजांतरं भुजमध्यं वक्ष इति यावत् तत्र शोभमाने राजीवहारः कमलस्रक् च रमणीयं सुंदरं यत्सितोपवीतं शुभ्रयज्ञोपवीतं च ते द्वे ययोस्तौ शोभाधामवाम हृदयसंशोभितपद्मसद्मावस्त्रस्रजा विसर्पणः स्पष्टनिवातस्थानीयायादीपकलिकादीपशिखा राजंती या सुदीपकलिका सा उपमा ययोस्ते तथाभूते रम्ये नासे ययोस्तौ दीपशिखा समनासाविसर्पणः गंभीरेण नतोन्नतो नाभिर्यस्मिन् तथाभूतं वरं श्रेष्ठं तुंदमुदरं तत्र वलित्रयं ययोस्तौ नाभिर्मुख्यनृपेचक्रमध्यक्षत्रिपयोः

हरिसं॰ पुमान्॥ हृयोः प्राणिप्रतीके स्यादिति मेदिनी॥५०॥ श्रीमदिति श्रीमती शोभायुक्ते सितेऽर्कनेत्रेऽम्बरे च सर्ग॰२
॥२४॥ स्थलतयोर्धरो धारको मुनीनां चेन्द्रौ स्तेनरम्यौ रमणीयौ कृष्णाजपरश्च कृताक्षं चातुर्वर्ण्यादीनां स्वार्थे ष्यञुपसंख्यान
मितिजपपराख्यात्स्वार्थे ष्यञ् तस्य तदर्थं वा मालाप्रवरदंडः पालाशदंडः पालाशो दंडो ब्राह्मणस्येति गदितोक्तेः
स च साचले हस्तयोः स्थितिर्ययोस्तौ कामैः परिपूर्णौ परिपूर्णकामौ वाहिताग्न्यादिष्विति साधुः अथवा परि
पूर्णः कामो मनोरथो ययोस्तौ। तौ नरनारायणौ। वीक्ष्य प्रमोदभरे हर्षोद्रेके मग्ना निरूदया स्त्रियेयांते सर्वमुन

श्रीमत्सितांबरधरौ मुनिवेन्द्ररम्यौ हस्तस्थितप्रवरदंडकजाप्यमालौ। तौ वीक्ष्य सर्वमुनयः परिपूर्णकामौ तूर्णं
गत प्रमोदभरमग्नहृदः प्रणेमुः॥५१॥ कृत्वा ते हरिचेतसः कृपूजां नीराजनं श्रुतिगदितां नमस्क्रियां च॥ गांभीर्यप्रश
मदमप्रतोषनूनीलाधाम्नोस्तामृषिवरयोः स्तुतिं च चक्रुः॥५२॥ इति श्रीहरिसंभवे महाकाव्ये हर्यंके कविश्री
मद्विसान्नस्वर्णाद्धृते गोलोकादिवर्णनं नाम द्वितीयः सर्गः॥२॥ योये पूर्वमभिहितास्ते विश्वर्षयः ना
वेवत्तूर्णं त्वाघ्रं प्रणेमुः प्रणाममकुर्वंत॥५१॥ कृत्वेति हरिं भगवंतं गतानि प्राप्तानि चेतांसि येषां ते पूर्वोक्ता मु
नयः गांभीर्यं च प्रशमश्च दमश्च प्रतोषश्च नूनीलं च तेषां माधाम्नोः सर्वतो गृहयोः धाम रम्यो गृहे देहनिविष्टमेदि ॥२४॥

न्यौ कृषिवरयोर्नरनारायणयोः श्रुतिगदितां वेदोदितां कृपूजां सपर्यां कृत्वा विधाय नीराजनं तयोर्नीराजनं च
कृत्वा नमस्क्रियां प्रह्वीभवनं च कृत्वा तां प्रसिद्धां स्तुतिं नुतिं चक्रुः प्रहर्षिणीयं वृत्तं म्नौ ज्रौ गस्त्रिदशयतिः प्र
हर्षिणीयमिति तल्लक्षणात्॥५२॥ इति श्रीपदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीना
नाथभट्टद्विजप्रसक्षवासुदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमुनिप्रेरितम
तिमाधवदाससत्सहायमासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृते हरिसंभ
वकाव्यसविद्वज्जनाह्लादिनामकव्याख्यायां द्वितीयः सर्गः॥२॥ ॥लि॰ रावलजेगामोरारजी संवत् १९
५६ ना माहाशुदी ८ अष्टमी ने बुधवासरे में थाणग्रामे समाप्ता॥ श्री॥ श्री॥ श्री॥ श्री॥